In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला (iii) - 03

श्रीकृष्णकविप्रणीतम्

॥ उत्तररङ्गमाहात्म्यम् ॥

(चपेटाहतिस्तुतिसहितम्)

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः परियोजना – अनुसन्धाता च

आचार्यः के. नीलकण्ठः

निदेशकः

सम्पादिका

डा. के. वरलक्ष्मीः

उपनिदेशिका

सहायकः

डा. के वि सूर्यप्रकाशः

शोधसहायकः

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2024

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला (iii) - 03
In Public domain. Digitization Muthulakshmi Research Academy

श्रीकृष्णकविप्रणीतम्

॥ उत्तररङ्गमाहात्म्यम् ॥

(चपेटाहतिस्तुतिसहितम्)

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः परियोजना – अनुसन्धाता च

आचार्यः के. नीलकण्ठः

निदेशकः

सम्पादिका

डा. के. वरलक्ष्मीः

उपनिदेशिका

सहायकः

डा. के वि सूर्यप्रकाशः

शोधसहायकः

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2024

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (iii)- 03

Uttararaṅgamāhātmyam with Capeṭāhatistuti

(Re-printing of rare book project)
This book is published with the financial support under Ashtadashi Scheme of **Central Sanskrit University, New Delhi**

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University,
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Uttararaṅgamāhātmyam with Capeṭāhatistuti

ISBN – 978-81-969575-6-8

© Sanskrit Academy

Year	:	2024
Pages	:	xxxii+88
Copies	:	300
Price	:	₹ 300

Sanskrit Academy Sasthyabda Granthamālā (iii) - 03
In Public domain. Digitization Muthulakshmi Research Academy

Uttararaṅgamāhātmyam

with

Capeṭāhatistuti

of

Sri Krishna Kavi

(Published under 'Re-printing of rare books project', Ashtadashi scheme of Central Sanskrit University, New Delhi)

Chief-Editor & Project Investigator

Prof. K. Neelakantham

Director

Editor

Dr. K. Varalakshmi

Dy. Director

Assistance

Dr. K V Suryaprakash

Research Assistant

Sanskrit Academy

Adarsha Shodha Sanstha

(Recognised by Central Sanskrit University, New Delhi)

Osmania University, Hyderabad – 500 007

2024

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (iii)- 03

Uttararaṅgamāhātmyam with Capeṭāhatistuti

(Re-printing of rare book project)
This book is published with the financial support under Ashtadashi Scheme of **Central Sanskrit University, New Delhi**

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University,
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Uttararaṅgamāhātmyam with Capeṭāhatistuti

ISBN – 978-81-969575-6-8

© Sanskrit Academy

Year : 2024
Pages : xxxii+88
Copies : 300
Price : ₹ 300

In Public domain. Digitization by Muthulakshmi Research Academy

Preface

ओम् श्री गुरुभ्यो नमः

।।श्रीशङ्करभगवत्पादाः विजयन्ते।।

We have published three champukavyas *Śrinivāsa vilāsavilasacampū, Raghunāthavijayacampū, kārtikotsava dīpikā campū* written by Krishnakavi who is also famous as Hosadurgam Krishnamacharya. According to the History this Krishnakavi is said to have been lived between 1830 - 1919, and composed 100 above books on various Shastras, Kavyas, stotras. He took sannyasaasrama on the advice of his gurus and became famous as Srimatparamahamsa Parivrajakacharya Sri Krishna Brahmateertha Yateendra. This great poet has written some Kavyas in Sanskrit on the holy places/sacred temples of erstwhile Palamuru (Mahaboobnagar) district of Telangana State. *Uttararaṅga māhātmyam, Madanagopālamāhātmyam Kārtikotsava dīpikā, Srīnivāsavilāsacampūprabandham, Siṅgavaṭaṃ nṛsiṃha purāṇam* are some of the laghukavyas in which Krishnakavi tried to highlight the importance of respective deities of temples which were constructed during the rule of Samsthanams in Telangana area. He composed these Kavyas following the style of Puranas. His main aim of composing Kavyas on these holy places to make people know the history, the greatness and power of sacred deities of temples. He has chosen the style of Puranas which are very famous for glorifying the magnanimity and purity of sacred deities and holy places.

Among these we have edited and published the two kavyas Śnivāsavilāsacampū, *kārtikotsava dīpikā* which were composed in praise of Lord Kurumurthy and Chennakeshava respectively. And now bringing out

In Public domain. Digitization Muthulakshmi Research Academy

Uttararaṅga māhātmyam along with *Capeṭāhatistuti* of Krishnakavi.

He wrote *Uttararaṅga māhātmyam* in praise of Lord **Sriranga** of Srirangapuram near Wanaparthy. According to the history the temple of Sri Ranga[1] was built in the year 1670 on the hill called Garudadri near the village Korivipadu in Palamuru district[2]. It was built by Gopalaraya who was well versed in eight languaues. He was famous as Ashtabhashakavi[3] and said to have been written many kavyas in Telugu. SriKrishnakavi composed *Uttararaṅga māhātmyam* in 10 adhyayas and 513 verses. He narrated the story of Garuda, Kadru and Vinata in beautiful Sanskrit. We have *Capeṭāhatistuti* a small Stotra Kavya with 27 verses at the end. In this the poet explained the love quarrel (प्रणयकलह) that took place between Lord Sriranga and Neeladevi. This narrative delights the Sahrudyas.

I appreciate the honest efforts Dr K. Varalakshmi, Deputy Director of the academy. She made a thorough research on the life of Krishnakavi and prepared a very comprehensive foreword that could be useful for further research on the contributions of Samsthanas in Telangana. She collected all the evidences of History of

---

[1] In this temple Lord Ranganatha lying on Sesha the king of serpents. Lord Ranganatha accompanied by Sridevi, Bhudevi and Neela devi. A beautiful and sacred temple sanctifies the devotees who ever visit and seek blessings of Sri Ranganatha. A very huge lake called Rangasamudra and beautiful Pushkarini named as Ratnapushkariny were also built near the Temple.

[2] ततोऽयं शैलेन्द्रो गरुडगिरिनाम्ना निजगदे
त्तदेदं रङ्गं चोत्तरमिति पुराणैर्मुनिगणैः ।।

[3] अष्टभाषाकृती तस्य बहिरीख्यातिमान्सुतः ।
गोपालरायनामाभूद्भूपालो लोकविश्रुतः ।।

In Public domain. Digitization Muthulakshmi Research Academy
Samsthanams and particularly here the history of the temple of Sri Ranganatha. I am pleased very much and congratulate Dr. K. Varalakshmi and wish her to bring some more critical studies based on the rare Sanskrit works.

I thank all my colleagues for helping me to bring out this book under the reprinting of rare books in Ashtadashi scheme.

I thank another deputy director Dr V. Subrahmanyam (presently on deputation in Pune) for his continuous help in the publication of Academy and congratulations to Sri K. V. Suryaprakash senior research assistant. My thanks to Dr Joshi Santosh Kumar research assistant in the academy. I bless my young and sincere research scholar Mr Joshi Bharadwaj who made this book ready for publication.

I thank Prof Srinivasa Varkhedi Hon'ble V.C. and Prof. Gayatri Murali Krishna Registrar I/c Central Sanskrit University, New Delhi for their continuous encouragement and for sanctioning such projects to Sanskrit Academy. I thank our Hon'ble Chairman Prof. D. Ravinder V. C. and Prof. P. Lakshmi narayana Registrar of Osmania University for their amicable support for the development of Sanskrit Academy. I thank Prof. Madhukeshwar Director, central schemes in CSU Delhi.

I thank Karshak Art Printers Vidyanagar, Hyderabad for printing this book on time.

सुधीजनविधेयः

Prof. K. Neelakantham
Director

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

प्राक्कथनम्

वनपर्तिसंस्थानस्य धर्मगुरुः होसदुर्गं कृष्णमाचार्यः महबूबनगर-जिल्लायां विद्यमानानां दिव्यक्षेत्राणि आश्रित्य स्थल पुराणानि व्यरचयत्। वनपर्तिसंस्थानस्य श्रीरङ्गापुरदिव्यक्षेत्र मधिकृत्य उत्तररङ्गमाहात्म्यं जटाप्रोलुसंस्थानस्य मदनगोपालदिव्य क्षेत्रमधिकृत्य मदनगोपालमाहात्म्यं गद्वालसंस्थानस्य चेन्नकेशव देवालयमधिकृत्य कार्तिकोत्सवदीपिकां आत्मकूरुसंस्थानस्य कुरु मूर्तिदेवालयमधिकृत्य श्रीनिवासविलास चम्पूप्रबन्धं, सिङ्गवटं नृसिंह पुराणम् इत्यादीनि दिव्यक्षेत्रसाहित्यपरकाणि काव्यानि विरचय्य संस्थानपालकानां प्रशंसापात्रतां गतः कृष्णकविः। दक्षिणभारत संस्थानानाम् संस्कृतिम् इतिहासं संस्थानपालकानञ्च आध्यात्मिक प्रवृत्तिं परोक्षतया ग्रन्थस्थं चकार होसदुर्गं कृष्णमाचार्यः[4]।

श्रीशैलवंशपम्परा – विद्वत्परम्परा

अस्य विशेषाः रघुनाथविजयचम्पूकाव्ये अस्माभिः स्पष्टीकृताः[5]।

संस्थानानि – सम्माननानि[6]

गद्वाल-वनपर्ति-आत्मकूरु-आनेङ्गुदि-जटाप्रोलु चेति चतुर्षु संस्थानेषु प्राप्तसम्मानवृत्तिः कविरिति ज्ञायते। न केवलं तेलङ्गाणा राज्यस्थसंस्थानेषु अपिच महीशूरराज्ये (मैसूरुराज्ये) विञ्चूरपुर संस्थाने च प्राप्तसम्मानवृत्तिरिति कृष्णकविकृतिपरिशीलनेन ज्ञायते। ग्रन्थप्रमाणानि क्रमशः प्रस्तूयन्ते।

1. आनेङ्गुन्दिसंस्थानम्

'आनेङ्गुन्दिक्षितीन्द्रात्तिरुमलनृपतेः प्राप्तसन्मानवृत्तिः
श्रीमच्छ्रीसज्जयार्याभिधगुरुणा प्राप्तविद्याविलासः'

---

4 होसदुर्गं कृष्णमाचार्यस्य जीवनवृत्तम् उद्दिश्य अस्माभिः मुद्रापितेषु श्रीनिवासविलास चम्पूकाव्ये रघुनाथविजये स्पष्टमुल्लिखितम्।।

5 रघुनाथविजयचम्पूः, प्राक्कथनम् पृष्टसंख्या 11

6 तेलङ्गाणाराज्ये विद्यमानानि प्रमुखसंस्थानानि यानि आन्ध्रसंस्थानमुलु – साहित्यपोषणमु इति ग्रन्थे उल्लिखितानि ।

In Public domain. Digitization Muthulakshmi Research Academy

2.वनपर्तिसंस्थानम् – वनपर्तिसंस्थानस्थं श्रीरङ्गापुरमधिकृत्य उत्तररङ्गमहात्म्यं व्यरचयत्। चपेटाहतिस्तुतिः रामेश्वरविजय चम्पूः श्रीरङ्गापुरदेवा लयस्य चारित्रकशिलाशासनानि चापि कृष्णकविना विरचितानि।

'कृष्णागोदावरीसंवलयित वनपर्त्याख्यपुण्याग्रगण्य
श्रीमद्रामेश्वराख्यक्षितिपतितिलकास्थानकव्यग्रगण्यः' श्री.वि.5-22

"अखण्डधरामण्डलमण्डनायमानसकलरसिकजनमानसोल्लासाहोऽयं कृष्णा-गोदावरीमध्यसमेधमानवनपर्तिराजधानीनाथ सवैराजा बहिरीबलवन्तबहदुरु-रामकृष्णराय-महाराजाज्ञया श्रीप्रत्यग्रदुर्गकवि गण्डभेरुण्डकृष्णार्यविरचितः रामेश्वरविजयाख्यश्चम्पूप्रबन्धः चपेटास्तुत्या सह।" रा. च

आत्मकूरुसंस्थानम्– आत्मकूरुसंस्थानस्य प्रभोः मुक्करसीताराम भूपालस्य प्रार्थनया कुलदेवतायाः सुप्रसिद्धश्रीवैष्णव क्षेत्रस्थ श्रीकुरुमूर्तिस्वामिनः वर्णनपरकः श्रीनिवासविलासः इति प्रबन्धः कृष्णकविना विरचितः। ततः कृष्णकविः गजारोहाणबिरुद प्रदाना दिभिः सत्कृतः। राज्ञः आज्ञया तिरुपतिवेङ्कटकवी तेलुगु भाषया श्रीनिवासविलासचम्पूं (ख्रिस्ताब्दे 1986) पद्यरूपेण अनूदित वन्तौ। सिङ्गवटं नृसिंहपुराणम् अपि कृष्णकविना विरचितम्।

'तत्तादृक्षात्मकूरूत्तमपुरवसतेः मुक्कराख्यान्वयेन्दोः
श्रीसीतारामभूमीपतिमकुटमणेस्तादृशास्थानभागे।।
सन्धीभूतैः कवीन्द्रैः समदकविघटागण्डाभीरूढनाम्ना-
हूतः श्रीशैलताताभिधकृतितनुजो नूत्नदुर्गात्तवासः'।। 23।।

रघुनाथपालितं विञ्चूरपुरसंस्थानम् - रघुनाथविजयविलासः

'कविसार्वभौमबिरुदाकलितः श्रीवेङ्कटार्यसहजातः
रघुनाथविजयमेनं व्यतनोद्दिनमेकमेव कृष्णाख्यः।।24

इति कविकृष्णविरचिताया रघुनाथविजयचम्पवाः पञ्चमो विलासः।

In Public domain. Digitization Muthulakshmi Research Academy

गद्वालसंस्थानम् – गद्वालसंस्थानस्य अधिपस्य श्रीरामभूपालस्य प्रार्थनया तत्कुलदैवतस्य गद्वालकेशवस्वामिनः उत्सवं कथावस्तु रूपेण स्वीकृत्य कार्तिकोत्सवदीपिकां[7] व्यरचयत् कृष्णकविः।

महीशूरपुरम् (मैसूरुराज्यम्) चमाराजेन्द्राशीर्नवरत्न मालिका इति रचनया महीशूरपुरस्थचामराजेन्द्रप्रभोः सम्मानन मपि प्राप कृष्णकविरिति ज्ञायते। यदा कृष्णकविः परकाल मठाधिपत्यं स्व्यकरोत् तदा श्रीसीताविलासदेवाजम्मायै भरन्यासदीक्षां प्रादादिति ग्रन्थेषु विवरणम् उपलभ्यते।

जटाप्रोलु-कोल्लापुरं संस्थानम्- जटाप्रोलु अथवा कल्लापुरम् इति संस्थानस्य प्रभोः राजावेङ्कटजगन्नाथरायलस्य प्रार्थनया नृसिंहविलासः मदनगोपालमहात्म्यं व्यरचयत् कृष्णकविः।

मदनगोपालमाहात्म्यम् - काव्येस्मिन् जटाप्रोलुसंस्थान वैभवं मदनगोपालस्वामिमहात्म्यं अगस्त्येश्वरजटेश्वरस्वामिनां प्रतिष्ठा हेतुः इत्यादयः विषयाः वर्णिताः। काव्ये द्वादशाध्यायाः 534 श्लोकाः सन्ति। भविष्योत्तरपुराणे विष्णुरहस्यविभागे जटायुक्षेत्रस्य गोपाल माहात्म्यादिविवरणानि सन्तीति कविः अध्यायान्तगद्ये उल्लिखति।

'मदनाकृतिरम्यत्वादिव्यमङ्गलविग्रहः।
सोऽयं मदनगोपाल इति नाम्नेरितस्त्वया'।।

नृसिंहविलासः - चम्पूकाव्यमिदं यद्यपि मुद्रितं तथापि अधुना नोप लभ्यते इति दौर्भाग्यस्य विषयः। सुरभिवंशचरित्रमु इति तेलुगु ग्रन्थे केचन श्लोकाः सुरभिवंशवर्णनपरकाः उपलभ्यन्ते। ते अत्र उद्धियन्ते।

तद्वंशे किल पेद्दशौरिरिति विख्यातो विनीतो गुणै
रासीद्भासितकीर्तिभूषितदिशाधीशालयप्राङ्गणः।

---

7 अयमपि चम्पूग्रन्थः अस्माभिः मुद्रापितः

In Public domain. Digitization Muthulakshmi Research Academy

राज्यं पालयति स्म यस्तु सुरभिग्रामेऽतिधीमेदुर
स्तद्वंश्या यदुपज्ञमेव सुरभिक्ष्मापालतां बिभ्रति[8]।।

बिरुदानि विद्वत्कविः कवीन्द्रः कविसार्वभौमः समदकवि घटागण्डभेरुण्डः इति बिरुदाञ्चितः कृष्णकविः। श्रीनिवास-विलासचम्पूप्रबन्धस्य निशमनावसरे आत्मकूरुपूराधिपस्य सीतारामभूपालस्य आस्थान कविगणेन समदकविघटागण्ड भेरुण्डबिरुदः प्रदत्तः। बिरुद प्रदानात्पूर्वं गजारोहणेनापि कविः सत्कृतः इति वर्णितम्।

परश्शतग्रन्थकर्त्ता – नवदुर्गं कृष्णकविः

कविरयं शताधिकान् ग्रन्थान् व्यरचयत्[9]। श्रीहयग्रीवबोधस्तुतिः श्रीनारायणाष्टकञ्चेति द्वे रचने गोलकोण्ड कवुलसञ्चिकायां उपलभ्येते। श्रीहयग्रीवप्रबोध स्तुतिः कविकुल तिलकश्रीहोसदुर्गं कृष्णमाचार्य कृतिरिति श्रीनारायणाष्टकम्। श्री मत्परमहंसपरिव्राज काचार्यश्रीकृष्णपर ब्रह्मतन्त्र पराकलयतीन्द्र विरचितमिति गोलकोण्ड कवुलसञ्चिकायां दरीदृश्यते। किन्तु उभे रचने कृष्णमा चार्यस्य श्रीमत्परमहंस परिव्राजकाचार्यश्रीकृष्णपर ब्रह्मतन्त्र पराकलयतीन्द्र अत् अपर नामधेयस्य एव इति अवधेयम्। श्रीनिवासविलासचम्पू प्रबन्धः रघुनाथविजय चम्पूः कार्तिकोत्सव दीपिकाचम्पूश्च संस्कृत अकाडम्या मुद्रापिताः।

वनपर्त्तिसंस्थानम् – क्रि.श. 1517-क्रि.श. 1947

संस्थानस्यास्य मूलपुरुषः जनुंपल्लि वीरकृष्णारेड्डि पेलुबालगोत्रोद्भवश्च। क्रि.श. 1540 तमे वर्षे दिवङ्गतः। सूगूरु प्राक्तनं संस्थानमासीत्। कालक्रमेण वनपर्तिं राजधानीं विधाय पालकाः शासनं चक्रुः। श्रीरङ्गनायकस्वामिदेवालयः तेलङ्गाणा राज्ये महबूबनगरजिल्लायां श्रीरङ्गापुरग्रामे पेब्बेरुमण्डले विद्यते। कोरिविपाडु इति श्रीरङ्गपुरस्य प्राक्तनं

---

[8] (सुरभिवारिवंशचरित्रमु – पृ.सं. 78-87)
[9] रघुनाथविजयचम्पूः, प्राक्कथनम् पृष्टसंख्या 14, 15

In Public domain. Digitization Muthulakshmi Research Academy

नाम आसीत्। श्रीरङ्गनाथ देवालयस्य निर्माणादारभ्य कोरिविपाडुग्रामः श्रीरङ्गपुरनाम्ना प्रख्यातिं गतः।

श्रीरङ्गापुरम् - श्रीरङ्गनाथदेवालयः क्रि.श. 1670

अष्टाभाषाकविः गोपालरायः (क्रि.श. 1657-क्रि.श. 1675 शासनकालः) दक्षिणदेशपुण्यतीर्थयात्रां चकार। तस्मिन् सन्दर्भे क्रि.श. 1662 तमे वर्षे श्रीरङ्गक्षेत्रं अष्टभाषाकविः बहिरि गोपालरायः सन्ददर्श। तस्य प्रेरणया क्रि.श. 1670 तमे वर्षे कोरिविपाडुग्रामे गरुडाद्रिनामके शिलासमुदाये श्रीरङ्गनाथदेवालयं निर्मितवान् इति इतिहासविदः वदन्ति। उपदेवालयं विराजते रत्नपुष्करिणी। अत एव कोरिविपाडुग्रामस्य श्रीरङ्गपुरमिति नामान्तरं सुस्थिरं जातम्। एतान् विशेषान् देवालयमण्डप शिलाशासनं प्रमाणयति।

गोपालरायः रामचन्द्रोदयमिति श्लेषकाव्यं श्रृङ्गारमञ्जरीति भाणञ्च व्यरचयत्। श्रृङ्गारमञ्जर्यां श्रीरङ्गधामस्य उत्सवविशेषाः मनोहरशैल्या वर्णिताः।

देवालयविशेषाः -शेषशयनः श्रीदेवीभूदेवीनीलादेवीसहितः नाभिकमलविराज चतुर्मुख ब्रह्मसहितश्च श्रीरङ्गनाथः देवालयेस्मिन् विराजते। शुकनासिकमण्टपः चतुर्भुजतायारुकोवेल कल्याण मण्टपः पन्निद्धराल्वारस्य देवालयः रामानुजस्वामि देवालयः भाष्यकारालयः श्रीसीताराम चन्द्रदेवालयः वैकुण्ठद्वारं ध्वजस्तम्भः होमशाला पाकशाला वाहनशाला भूगृहं लघु आलयशिखरः कोठायिमण्डपं विश्रान्तिनिलयः शिलाध्वजस्तम्भः नौबत्खाना रथशाला संस्कृतपाठशाला आञ्जनेयदेवालयः आण्डालसन्निधिः पुष्करिणी कृष्णविलासः रत्नपुष्करिणी चेति निर्माणविशेषास्सन्ति।

रङ्गसमुद्रः - श्रीरङ्गनाथदेवालयस्य परितः विद्यमानः विशालः जलतटाकः रङ्गसमुद्र इति व्यवह्रियते। देवालयमण्डप शिलाशासनेस्योल्लेखः दृश्यते।

रत्नपुष्करिणी - काव्ये अस्योल्लेखः दृश्यते। क्रि.श. 1920 तमे वर्षे निर्मिता। **रङ्गनाथगोपुरशिलाशासनम्** 1804 **शा.वा.श. क्रि.श.** 1882 श्रीरङ्गनाथदेवालयस्य गोपुरं निर्मापितवती राज्ञी शङ्कराम्बा वनपर्तिराजस्य

 In Public domain. Digitization Muthulakshmi Research Academy

रामेश्वरस्य (द्वितीयः) धर्मपत्नी। तत्सन्दर्भे होसदुर्गं कृष्णमाचार्यः देवालये शिलाशासनानि व्यरचयत्। संस्कृतभाषया तेलुगुलिप्या च रचितानि एतानि शिलाशासनानि अद्यापि देवालये दृश्यन्ते।

'श्री।। शुभमस्तु श्रीमते रामानुजाय मनः। श्रीरङ्गनाथगोपुर शासनशिलेयम्। अस्मद्गुरुभ्यो नमः।स्वस्ति श्रीरङ्गनाथाय।

श्रीमद्गरुडशैलेन्द्रधाम धामचिरन्तनम्।
रामेश्वरेन्द्रदाराणां क्षेमं पुष्णातु सन्ततम्।।

सूगूरुदेशाधिपतेर्वीरकृष्णक्षमापतेः।
सुतोऽभूद्रामकृष्णेन्द्रस्ततो वेङ्कटभूपतिः।।

अष्टभाषाकृती तस्य बहिरीख्यातिमान्सुतः।
गोपालरायनामाभूद्भूपालो लोकविश्रुतः।।

कुमारबहिरीसंज्ञगोपालस्तत्कुमारकः।
सवैभव उदैत्तस्मात्सवै वेङ्कटभूपतिः।।

ततो गोपालभूपालाद्रामकृष्णाख्यभूमिपः।
तस्माद्रामेश्वरेन्द्रोऽभूद्विस्मापितजगत्त्रयः।।

In Public domain. Digitization Muthulakshmi Research Academy

प्रीत्यै स रङ्गनाथस्य सत्यैकान्तमतिर्नृपः।
नित्योत्सवादिकैङ्कर्यकृत्यान्यत्राभ्यवर्धयत्।।

देवी तस्यानवद्या बुधनुतमहिमा राजनीतिप्रगल्भा
पातिव्रत्यैकसीमा श्रुतविविधपुराणेतिहासार्थतत्त्वा
ब्रह्मिष्ठा सत्यवादिन्यति विमलयशा निर्मितानेकसत्रा
राज्ञी श्रीशङ्कराम्बा जयति सहभुवा जानमाम्बाख्ययैषा।।

पात्रे निक्षिप्य वित्तं धरणिसुरवरान् वृत्तिभिः प्रीणयित्वा
कृत्वोद्यानानि नानारघुतनयमुखादेवतास्स्थापयित्वा।
सत्काव्यं कारयित्वा तनयमुपयती रामकृष्णक्षितीशं
कृत्वा नूत्नं तटाकं निरुपधिमयते सप्त सन्तानलक्ष्मीम्।।

आच श्रीरामसेतोरघततिहरणादाबदर्याश्रमान्तात्
स्नात्वा तीर्थेषु नारायणमनघगुणं क्षेत्रसीमासु नत्त्वा।
रङ्गेन्द्रस्य व्यतानीदनितरसुकरं गोपुरं तुङ्गमेत
त्कैङ्कर्यं तत्पदाब्जे सकलमपि कृतं सावधानार्पयन्ती।।

श्रीचित्रभानुवर्षे गानदयप्रमितशालिवाहशके 4081 गोपुरमेदतुदारं स्थापितमिह शङ्कराम्बया राज्ञ्या।10।

अच्युतः प्रीणातु। स्वस्ति। श्रीशालिवाहनशकाब्दाः 1804 (क्रि.श. 1882) श्रीचित्रभानु नाम संवत्सरमार्गशीर्षमासमुनन्दु श्रीमत्सवै राजा रामेश्वररावु बहिरीबलवन्त बहदुरुगारि भार्ययैन श्रीमन्तसवै शङ्करम्मगारिचे श्रीरङ्गनाथप्रीत्यर्थमुगा नीगोपरकैङ्कर्यमोनर्चबडिये। मङ्गलं भवतु।

रामेश्वरेन्द्रललनामणिशङ्कराम्बाकैङ्कर्यमेतदधिभूतलमेधिषीष्ठ ।
आचन्द्रतारकमियं जयतात्कृतिश्च प्रत्यग्रदुर्गपुरकृष्णकवीन्द्रकृष्टा।।11।।

 In Public domain. Digitization Muthulakshmi Research Academy

शुभमस्तु।

शासनस्थश्लोकाः अधिकतया राजवंशरत्नावलितः सङ्गृहीतानीति लक्ष्यन्ते।

जाया तस्यानवद्या बुधनुतमहिमा राजनीतिप्रगल्भा
पातिव्रत्यैकसीमाश्रुतविविधपुराणेतिहासार्थतत्त्वा ।
ब्रह्मज्ञा सत्यवादिन्यतिविमलयशा निर्मितानेकसत्रा
राज्ञी श्रीशङ्कराम्बा जगति विजयते राजमूर्धन्यरत्नम् ।।

पात्रे निक्षिप्य वित्तं धरणिसुरवरान् वृत्तिभिः प्रीणयित्वा
कृत्वोद्यानानि नानारघुतनयमुखादेव तास्स्थापयित्वा ।
सत्काव्यं कारयित्वा शुभतनयवती रामकृष्णक्षितीशाकृत्वा
नूत्नं तटाकं निरुपधिमयते सप्त सन्तानलक्ष्मीम् ।।

आच श्रीरामसेतोरघततिहरणादाबदर्याश्रमान्तात्स्नात्वा
तीर्थेषु नारायणमनघगुणं दिव्यदेशेषु नत्वा ।
सर्वं कालं रहस्यत्रयविवरणसत्सम्प्रदायामृतानामास्वादेन
क्षिपन्ती जयति हरिपदाम्भोजयुग्मप्रपन्ना[10] ।।

राजवंशरत्नावलीति लघुकृतावपि रङ्गनाथगोपुरनिर्माणं राज्ञ्या शङ्कराम्बया कृतमिति उल्लिखितम्[11]।

रङ्गनाथदेवालयमण्डपशिलाशासनम्

क्रि.श. जनवरिमासे 12 दिनाङ्के 1909 क्रिस्ताब्दे प्रतिष्ठितमीदं शिलाशासनम्[12]।

---

10 रा.र. 22, 23, 36

11 खगाधिपनगाधिपोत्तमशिरस्थलप्रोल्लसन्महोच्चमकुटीनिभं खलु तयैव निर्मापितम् रा.र. 38, 39

12 (ए. मोहनरेड्डि विरचितात् ओरियण्टलाङ्गन् इति संस्थया मुद्रितात् च वनपर्तिसंस्थानम् - तेलुगुसाहित्यसेवा इति ग्रन्थात् सङ्गृहीतम्।)

In Public domain. Digitization Muthulakshmi Research Academy

श्रियै नमः श्रीमते हयवदनपरब्रह्मणे नमः।

श्रीमदुत्तररङ्गनाथाय नमः

स्वस्ति श्रीगरुडाद्रिशेखरमणे रङ्गेशितुश्शासनम्।
जीयात् सर्वसुरासुरालिमकुटीकोटिनिबद्धाननम्।
यद्वैश्वानरचित्रभानुदिविषन्नेत्रादिवित्रासनम्।
यच्च श्रीवनपर्तिभूपतिमणिश्रेयस्समुद्भासनम्।। 1 ।।

श्रीश्रीकृष्णब्रह्मतन्त्रपरकालयतीशिता।
मङ्गलाशासनम् श्रीमदिदं ग्रन्थाति शासनम्।। 2 ।।

पेनुबालगोत्रकृतजनिजनपालशिरोमणिर्वरो महताम्।
आसीत्किलाष्ट भाषा बहिरी गोपालरायभूपालः।। 3 ।।

करिनिधिशरशशभृन्मित 1598 नलशरदवधीह शालिवाहनशके।
सूगूरुराजधानीं यः पालयति स्म धन्यमूर्धन्यः।। 4 ।।

यश्च जनुम्पल्लयन्वयशशभृच्छ्रीवीरकृष्णनृपनप्ता।
इम्मडिवेङ्कटरेड्डिक्षितिपश्रीवीरमाम्बयोः पुत्रः।। 5 ।।

स कदाचित् प्रस्थितवान् दक्षिणदिग्दिव्यदेशयात्रार्थम्।
श्रीरङ्गादिमदिव्यक्षेत्रेष्वासेव्य भव्यमब्दाक्षम्।।.....6 ।।

विनिवृत्य स्वपुरं प्रति भूत्वा श्रीरङ्गमयमनोवृत्तिः।
निजदेशे निरमासीच्छ्रीरङ्गपुराख्यमेष किल नगरम्।।..... 7 ।।

तत्परिसरे तटाकं रङ्गसमुद्राख्यमपि निरमिमीत।
तदुपान्तग गरुडाचलशिखरे देवालयं तटाकमपि।।.....8 ।।

श्रीरङ्गात्स्वानीतां श्रीभूसखरङ्गनाथदिव्यार्चाम्।
उत्सवबेरवया(?)ऽसावागमतः प्रत्यतिष्ठिपत्तत्र।।.....9 ।।

क्रमेणाथ गोपालभूपालनप्ता सवै वेङ्कटग्रामणी भूमिनेता
जनुम्पल्लिवंशोल्लसन्मौक्तिकश्रीः प्रशस्तप्रभावः प्रशास्ति स्म पृथ्वीम्

In Public domain. Digitization Muthulakshmi Research Academy

या पूर्वं प्रपितामहेन रचिता गोपालपृथ्वीभृता
तां श्रीरङ्गपुराभिधामधिवसन् स्वां राजधानीं घनाम्।
रङ्गेद्रोत्सवबेरमेव गरुडक्ष्माभृत्यवेक्ष्य स्थितं
तस्मिंस्तादृशमूलबेरमपि चाधातुं मनस्सन्दधे।। 11 ।।

याते ततो बहुतिथे समये कदाचित्
स्वप्ने नृपाग्रभुवि वैष्णवरूपमेत्य।
स्थित्वावदद्धरिरहं गरुडाद्रिनाथो
मां विद्युपागतमिह त्वदनुग्रहाय॥12।।

इदं क्षेत्रं दिव्यं जगति विदितं कश्यपमुनेः।
पुरा रङ्गेशोऽहं विहगपतिनाऽध्यक्षित इह।
ततोऽयं शैलेन्द्रो गरुडगिरिनाम्ना निजगदे
त्तदेदं रङ्गं चोत्तरमिति पुराणैर्मुनिगणैः।। 13 ।।

पुरा ब्रह्माराध्योऽभवमिह ततः कश्यपमुने
स्समर्च्यः पाताले भुजगपतिनाऽसेविषि ततः।
ततोऽहं वल्मीकादिह गरुडहेतोरुदभवम्
कलेर्दोषादन्तर्हित इह ततोऽभूवमवनौ।। 14 ।।

कानायपल्ल्यवनिसीमनि भाति रङ्गं
पेटाभिधे जनपदेऽत्र तवैव देशे।
वल्मीकमस्ति हि सनातनदेववेश्म
न्यर्चात्मना स्थितिमुपैमि चिरात्तदन्तः।। 15 ।।

प्राक्पत्रिणां पतिरिव त्वमपि प्रकामं
भक्ताग्रणीरसि ममेति तव प्रसन्नः।
अर्च्यस्त्वदन्वयजभूपतिभिर्भवेयं
मां स्थापयावनिपते गरुडाद्रिमूर्ध्नि । 16

स्वप्ने हरेर्निशमयन्वचनं प्रबुद्धोऽ
थानाय्य चार्चकमुखाद्गरुडाचलाद्रेः।
तां प्रत्यतिष्ठिपदसावपि रङ्गिणोऽर्चां
श्रीपञ्चरात्रविधिना किल वेङ्कटेन्द्रः।।17 ।।

पञ्चाशीत्युत्तरषोडशशततमवत्सरे 1685 स्वभान्वभिधे।
श्रीशालिवाहनशके वृत्तमिदं वेङ्कटक्षितिपकाले।। 18 ।।

सवै जानम्माख्या तदनु दयिता वेङ्कटविभोः
स्नुषा जानाम्बान्याऽप्यवनिमवति स्म क्रमवशात्।।
तयोः काले श्रीमद्गरुडगिरिनेतुः प्रतिपदं
महोत्सा (महोत्सवाः) नित्योत्सवमुखमहावृद्धिमगमन्।। 19 ।।

सानन्दं कन्दनूरुप्रभृतिजनपदान्नैगमानागमय्य
प्रापय्य क्रय्यभावं वृषमुखमखिलं निस्तुलं वस्तुजालम्।।
तत्पुत्रो रामकृष्णप्रभुरथ गरुडाद्यङ्गणे रङ्गनेतु
स्तस्य ब्रह्मोत्सवं च प्रचुरविभवतोऽवीवृधन्नीवृतास्वे।। 20 ।।

अत्र शके नवलोचनसप्तधरा 1729 सम्मितप्रभवशरदः।
आरभ्योत्सववैभवमभिवृद्धं रामकृष्णनृपसमये।। 21 ।।

श्रीरामेश्वरराडमुष्य तनयश्श्रीगारुडाद्रीशितुः।
श्रीरङ्गादिमदिव्यदेशसदृशीं नित्यार्चनापद्धतीम्।
वर्षे कीलकनाम्नि भाद्रसमये निर्णीय साधारणे
तोताद्यागतविष्णुचित्तगुरुभिस्तीर्थं तथाऽजिग्रहत्।। 22 ।।

जाया तस्य जगत्प्रतीतसुगुणा श्रीशङ्कराम्बामणिः
श्रीमत्युत्तररङ्गधाम्नि गरुडक्ष्माभृत्किरीटायिते।
निर्मायाद्भुतशिल्पकल्पनघने प्राग्दक्षिणे गोपुरे।
प्रीतिं रङ्गपतेर्व्यधाद्व्यय तपश्शुक्ले दिने पञ्चमे।। 23 ।।

 In Public domain. Digitization Muthulakshmi Research Academy

प्राचीनस्वकुलाष्ट भाषाबहिरी गोपालरायेण
यस्सूगूराख्यपुरे व्यधायि सुमहान्गोपालदेवालयः।
तं वीक्ष्याथ वृथा स्थितं बहु चिराद्देवप्रतिष्ठापनादैच्छ
च्छ्रीगरुडाचलं गमयितुं सा शङ्कराम्बामणिः। 24 ।।

खेन्द्वष्टक्षिति 1810 शालिवाहनशके अब्दे सर्वधार्याह्वये
गोपालालयमुख्यमण्डपमथानाय्य प्रयत्नादसौ।।
ताराक्ष्यद्रौमुखमण्डरं व्यरचयद्रङ्गेशितुस्सन्निधेः
किं किं कर्म वदामहेऽद्भुतमिति श्रीशङ्कराम्बामणेः।। 25 ।।

तत्पौत्रस्तदुदारता सगुणधीस्सूगूरुदेवालया-
च्छिष्टं मण्डपभागमप्यतितरामानाय्य रङ्गेशितुः ।
व्यातेनेऽध्ययनोत्सवार्थमितरं दिव्यं महामण्डपं
श्रीरामेश्वरराय राडिह महाभूपालचूडामणिः।। 26 ।।

श्रीमति पराभवाख्ये वस्वक्षिगजेन्दुसम्मितशकाब्दे 1828
कार्तिककृष्णचतुर्थ्यां कलितमिदं मण्डपं हरेः प्रीत्यै।। 27 ।।

महाभूपालाख्या कलितबलवन्ताख्यबिरुदो
बहिर्याख्याजुषो बहदरुसवैराजपदभाक्।
समं लक्ष्म्या देव्या सह च तनुजातैस्सह तथा
पितामहा रामेश्वरनृपवरेण्यो विजयताम्।। 28 ।।

विजयतां गरुडाद्रिशिखामणिर्विजयतामिदमीय महोत्सवः
विजयतां वनपर्तिनृपान्वयो विजयतामिदमस्य च शासनम्।। 29 ।

भक्तिभारकृतसंविधानया मण्डपादिमसपर्ययाऽनया
पक्षिराडचलकल्पितस्थितिः प्रीयताम् स भगवान् श्रियःपतिः।। 30

क्रिस्तुशके 1909 जनवरि मासे 12 दिनाङ्के।।
समस्तसन्मङ्गलानि भवन्तु।।श्रीः।।

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मोत्सवाः- प्रतिवर्षं फाल्गुणशुद्धसप्तमीतः बहुलविदि यपर्यन्तं ब्रह्मोत्सवाः प्रचलन्ति। कल्याणोत्सवः रथोत्सवः तिरुनाळ्ळु इत्यादयः विशेषकार्यक्रमाः निरुह्यन्ते। हरिकथाः वेदगोष्ठीः नृत्यकार्यक्रमाः गानप्रदर्शनानि अवधानकार्यक्रमाः अन्न दानसत्राणि नैकविधानि पुण्यकर्माणि अत्र आचर्यन्ते स्म। सप्तम्यां श्रीदेवीभूदेवीनीलादेवीनां रङ्गनाथस्य तिरुवञ्जनकार्यक्रमः अङ्कुरार्पणञ्च भवति। अष्टम्यां ध्वजारोहणकार्यक्रमः ङलचिय़ भरीपूजा षोडशोपचारपूजा यज्ञाः च भवन्ति। नवम्यां बालभोगः हवनविधिः मेनायां शेषशयनः रङ्गनाथः देवीसमेतः शोभयात्रायां दर्शनं ददाति। दशम्यां वासुदेवसङ्कर्षणं हवनं च भवति। एकादश्यां मोहिनीरूपः श्रीरङ्गनाथः दर्शनं ददाति। सायं गरुडवाहनः सन् देवः भक्तेभ्यः दर्शनभाग्यं कल्पयति।

चपेटाहतिस्तुतिमाला- फाल्गुणमासे एकादश्यां गरुडवाहनः श्रीरङ्गानाथः आण्डाल् देवीसन्निधिं प्राप्नोति। तत्सन्दर्भे होसदुर्गं कृष्णमाचार्यविरचितां चोपाटहतिस्तुतिमालाम् अर्चकाः गायन्ति। उत्तररङ्गमाहात्म्यम् इति काव्येन सह इयं स्तुतिरपि मुद्राप्यते इति विशेषः।

श्रीरङ्गापुरे वेदशास्त्रपरीक्षाः - वनपर्तिराजः रामेश्वररावः (द्वितीयः) (क्रि.श. 1870) बहिरी बलवन्त बहद्दरु इति बिरुदाञ्चितः श्रीसुरवरं प्रतापरेड्डिप्रभृतीनां प्रेरणया विद्याव्याप्तये भाषोद्धरणाय च श्रीरङ्गापुरे फाल्गुनपूर्णिमायां कविगायकसभाः कार्तिकपूर्णिमायां राजनगरे शास्त्रपण्डित-सभाः व्यवस्थापयति स्म। खण्डवल्लि नरसिंहशास्त्रिवर्यः व्याकरणस्य वनं सीतारामशास्त्रीवर्यः तर्कशास्त्रस्य टि गोपालाचार्यः वेदस्य टि.के.वि सुदर्शनाचार्यः मीमांसाशास्त्रस्य वेदाल तिरुमलरामानुजस्वामी आयुर्वेदस्य कप्पगन्तुल लक्ष्मणशास्त्रिवर्यः साहित्यस्य परीक्षकाः आसन्निति साहित्येतिहासग्रन्थेषु उपलभ्यते।

In Public domain. Digitization Muthulakshmi Research Academy

उत्तररङ्गमाहात्म्यम् - होसदुर्गं कृष्णकविविरचितमिदम् उत्तररङ्गमाहात्म्यं पुराणसाहित्य शैल्या विराजते। काव्यमिदं दश अध्यायसमन्वितम्। एकैकस्य अध्यायस्य वर्णनविषयानुसारं नामकरणमपि कविना विहितम्। महावीरप्रश्नः विनतादास्यकथनम् गरुडाविर्भावः गरुडगमनम् रङ्गनाथावतरणम् अमृताहरणप्रस्थानम् अमृतकलशाहरणम् विनतादास्यमोक्षणम् सर्वक्षेत्रवर्णनम् इति नव अध्यायनां नामानि सन्ति। काव्यश्लोकसङ्ख्या 513 अस्ति। प्रायः सर्वे श्लोकाः अनुष्टप् वृत्तग्रथिताः। गरुडस्य जन्मवृत्तं जीवनवृत्तञ्च विशेषतया मनोहरशैल्या वर्णितम्। तन्मध्ये रङ्गनाथावतरणं वर्णयति कविः। रङ्गनाथस्तोत्रपरकेण मङ्गलश्लोकेन काव्यमारभते कविः।

श्रीमान् गारुडभूमीभृद्धामा कामारिवन्दितः।
मङ्गलं रङ्गनाथो मे तुङ्गतुङ्गन्तरङ्गयेत्।।

कविः पुराणशैल्या अध्यायान्ते उल्लिखति यत् – **इति श्री भविष्योत्तरपुराणे उमामहेश्वरसंवादे श्रीमदुत्तररङ्गमाहात्म्ये दशमोऽध्यायः।**

काव्यारम्भे काव्यान्ते च स्वगुरुं नमस्करोति कविः। सर्वेषु काव्येषु होसदुर्गं कृष्णकविः श्रीनिवासब्रह्मतन्त्रपरकालमहादेशिकं भक्त्या संस्मरति। **श्रीश्रीनिवासब्रह्मतन्त्रपरकालमहादेशिकाय नमः।।**

अध्यायशः कथासारः

प्रथमोऽध्यायः महावीरप्रश्नः – 61 श्लोकाः

कुशपौत्रः नारदमुखात् रामायणकथां श्रुत्वा रामसेतुविलोकने मतिं चकार। राज्यभारं मन्त्रिषु निक्षिप्य यात्रार्थं प्रस्थितः। पुण्यनदीषु स्नात्वा सागरं प्राप। तत्र स्नात्वा ब्राह्मणेभ्यः दानं कृत्वा तत्र कतिचित् मासान् यावत् स्थित्वा श्रीरङ्गनगरीं प्राप। राजपुष्करिणीजले स्नात्वा देवदर्शनं चकार। ततः काञ्चीं प्राप। तत्र देवदेवं ददर्श। शेषाद्रिं प्राप्य श्रीनिवासम् असेवत। ततः नृसिंहं

रङ्गेन्द्रञ्च असेवत। यादवाद्रिं गत्वा वराहम् असेवत। ततः भगवत्क्षेत्रं किञ्चित् प्राप्य भोगीन्द्रे शयानं रङ्गनायकं वीक्ष्य विस्मितः कुशपौत्रः तत्रत्यान् मुनीन् रङ्गनाथस्य वृत्तं पप्रच्छ। ते च ऊचुः। गरुढस्य तपश्चर्यासन्तुष्टः नारायणः पुरा विमानं तस्मै प्रादात्। एतत् क्षेत्रं रङ्गनाथक्षेत्रमस्ति। श्रीमदुत्तरङ्गाख्यं क्षेत्रं गरुडाह्वयं गिरि सुधामुखं नदञ्च प्राहुः मुनयः। नारदः रङ्गनाथस्य सेवार्थमिह आगमिष्यति तस्य मुखादेव रङ्गनाथक्षेत्रस्य माहात्म्यं श्रुणु इति मुनयः कुशपौत्रम् अवोचन्। अनेनैव **महावीरप्रश्नः** नाम प्रथमाध्यायोऽयं समाप्तिम् एति।

द्वितीयोध्यायः विनतादास्यकथनम् – 51 श्लोकाः

अम्बरात् नारदः अवततार। सर्वे नारदं प्रणेमुः। नारदः सर्वेषां कुशलं पप्रच्छ। कुशपौत्रागमनस्य हेतुम् अपृच्छत् नारदः। उत्तररङ्गक्षेत्रमाहात्म्यं श्रोतुकामोस्मीति कुशपौत्रः नारदं प्रार्थयामास। नारदः रङ्गमाहात्म्यं वक्तुम् आरभत। कश्यपस्य विनता कद्रूरिति द्वे पत्न्यौ स्तः। कदाचित् उभे समुद्रतटं गते। तत्र उच्चैश्श्रवसं हयं ददृशतुः। तुरगस्यास्य वर्णः कः इति कद्रूः विनताम् अपृच्छत्। पाण्डुरः अस्य पुच्छः स्वच्छश्चेति विनता उत्तरं प्रादात्। तदा कद्रूः सकैतवं चिन्तयामास। विनता वञ्चनीया। दास्ये नियोक्तव्या चेति। तुरगः पाण्डुर एव किन्तु पुच्छस्तु नील एव इति कद्रूः वादं चकार। परस्परवादोपवादं कृत्वा यस्याः वचनं वितथं भवति सा अपरस्याः गृहे दास्यं आशरीरं विधास्यतीति पणं चक्रतुः। समीपं गत्वा पश्यावः इति विनता अवोचत्। अस्तमेष्यति सूर्यः अधुना। अतः प्रातः एनम् अश्वं पश्यामः इति कुटिलमतिः कद्रूरब्रवीत्। निजभवनं प्राप्य पुत्रानुवाच कद्रूः। उच्चैश्श्रवसः पुच्छः कृष्णः इति मया शपथः कृतः। अश्वस्य कृष्णा वाला भूत्वा मातुराज्ञां पालयन्तु इति कद्रूः पुत्रान् आदिदेश। कैतवेन विनता वञ्चिता। कद्रूभवने दास्यं चकार विनता। अनेन समाप्तिमेति **विनतादास्यकथनम्** नाम द्वितीयोऽध्यायः।

In Public domain. Digitization Muthulakshmi Research Academy

तृतीयोऽध्यायः गरुडाविर्भावः- 31 श्लोकाः

दास्ये वसन्ती विनता पतिं कश्यपं स्वदुःस्थितिं निवेदयामास। ओं नमो रङ्गनाथाय इति अष्टाक्षरं मनुं जप। तव गर्भात् द्वे अण्डे प्रजायेते। मन्त्रराजेन रक्षां कृत्वा वर्षसहस्रं परिपालय। तदा द्वौ महावीरौ जनिष्येते। त्वां दास्यात् मोचयितुं तौ समर्थौ। कश्यपस्य उपदेशं विनता सश्रद्धं पालयामास। द्वे अण्डे प्रासूत विनता। किन्तु चापल्यात् अण्डमेकं बभञ्ज। अपूर्णविग्रहम् अनूरुं पुत्रं वीक्ष्य उद्विग्नाभूत् विनता। विकलाङ्गकोऽहं त्वां त्रातुमशक्तः। यदि रक्षां करिष्यसि तदा वर्षसहस्रान्ते मम अनुजः जनिष्यते यः त्वां मोचयिष्यति। ततः सूर्यस्य सारथ्यं कर्तुं निर्जगाम अनूरुः। कदाचित् श्रीरङ्गनायकः विनता स्वप्ने प्रत्यक्षीभूय अब्रवीत्। मदनुग्रहात् पुत्रः जायते त्वाञ्च मोचयिष्यति इति। मुदिता विनता अण्डं ररक्ष। पूर्णे वर्षसहस्रे अण्डं भित्वा पूर्णविग्रहः गरुडः प्रादुरास। विनता हृष्टान्तरङ्गा पुत्रं अष्टाक्षरमन्त्रेण ररक्ष। पुत्रेण साकं विनता कद्र्याः दास्यं चकार। अत्रैव परिसमाप्तिमेति **गरुडाविर्भावो** नाम तृतीयोऽध्यायः।

चतुर्थोऽध्यायः गरुडगमनम् - 46 श्लोकाः

मात्राज्ञावशंवदः गरुडः कद्रूपुत्रान् असेवत। दास्येन खिन्नः गरुडः पितरं कश्यपम् उपागच्छत्। कश्यपः दिव्यं वृत्तं श्रावयामास। कृष्णीति तटिन्याः अनतिदूरे ब्रह्ममहीधरः अस्ति। यत्र ब्रह्मा तपः तेपे। ब्रह्मणा यत्र स्नानमाचरितं तं नदवरं ब्राह्मनदमिति आहुः जनाः। अस्मिन् सन्दर्भे कविः कुरुपतिक्षेत्रस्योल्लेखं चकार। कुरुपतिक्षेत्रस्थं श्रीनिवासं तदुत्सवञ्च श्रीनिवासविलासचम्पूप्रबन्धे वर्णयामास अयमेव कविः।

प्राच्यां कुरुपतिक्षेत्रात् कृष्णाया उत्तरे तटि। पश्चिमे नरसिंहाद्रे र्वेङ्कटक्षेत्रदक्षिणे।। उ.र.4.14

ब्रह्मणः मुखात् वृत्तमिदं श्रुत्वा तेनोपदिष्टं तं दिव्यमष्टाक्षरं महामनुम् आवर्तयन् तपः समाकर्षम्। तपसा प्रसन्नः नारायणः ओं नमो रङ्गनाथाय

In Public domain. Digitization Muthulakshmi Research Academy

इत्येतमष्टाक्षरं मनुम् माम् उपदिदेश। तत आरभ्य मुनयः तत्क्षेत्रं कश्पयक्षेत्रमिति व्यवहृतवन्तः। इति उक्त्वा कश्यपः पुत्रं मन्त्रम् उपदिश्य तपसा रङ्गनाथम् अर्चतु इति आदिशत्। मातुः विनतायाः अनुज्ञया गरुडः ब्रह्मभूधरं जगाम। अत्रैव समाप्तिमेति गरुडगमनमिति चुतर्थोऽध्यायः।

पञ्चमोऽध्यायः रङ्गनाथावतरणम् - 59 श्लोकाः

गरुडः ब्रह्मगिरि प्राप्य प्रणम्य ब्राह्मनदे स्नात्वा जपं कृत्वा गिरि प्रदक्षिणीकृत्य मुनीन् अभिवन्द्य नियतो भूत्वा महामनुम् आवर्तयन् तपस्तेपे। प्रसन्नः विष्णुः सपरिवारं गरुडानुग्रहार्थाय ब्रह्ममहीधरं ययौ। विष्वक्सेनः वरप्रदानाय विष्णोरागमनं ध्यानमग्नं गरुडं निवेदयामास। गरुडः ससम्भ्रमम् उत्थाय प्रणम्य देवस्य स्तुतिं चकार। त्वत्तपसा प्रसन्नोहम्। वरं वृणीष्व इति भगवान् उवाच। मातृदास्यमोक्षणमिति वरं दत्त्वा अनुगृहाण इति गरुडः प्रार्थयामाश। भगवान् विमानं प्रदाय रङ्गनाथाख्यां प्रतिमां पित्रोपदिष्टेन मन्त्रेण उपासतामिति यथा मयि तथा एतस्याम् प्रतिमायामपि भक्तिं वह। इदम् उत्तररङ्गाख्यं क्षेत्रम् इति प्रसिद्धिं प्राप्स्यतीति उवाच भगवान्। ततः वल्मीकात् दिव्यं विमानं प्रादुरास। दिव्ये मङ्गलरङ्गाख्ये विमाने शेषशयने शयानं रङ्गेन्द्रं ददर्श गरुडः। एनं रङ्गेन्द्रं पूजयति चेत् प्रसन्नोऽयं देवः भवदभीष्टं प्रदास्यतीति उक्त्वा भगवान् नारायणः अन्तर्दधौ। भगवदादेशानु सारं गरुडः रङ्गनाथम् आराधयामास। रङ्गनाथावतरणं नाम पञ्चमोध्यायः अत्रैव समाप्तिमेति।

षष्ठोऽध्यायः अमृताहरणप्रस्थानम् - 69 श्लोकाः

अष्टोत्तरशतेन नामभिः रङ्गनाथम् अर्चयामास गरुडः। प्रसन्नः रङ्गनाथः गरुडाय वरं प्रदातुम् ऐच्छत्। मातुः दुःखनिवारणम् अयाचत गरुडः। मम मातरं विमुञ्चेति कद्रूं पृच्छेति भगवान् असूचयत्। रङ्गनाथं प्रणम्य गरुडः गृहं गत्वा मम मातरं दास्यात् मोचयितुमर्हसीति कद्रूं प्रार्थयामाश यद्यदिच्छसि तद्दातुं प्रयतिष्ये मम मातरं दास्यात् मुञ्चेति पुनः प्रार्थयामास गरुडः। कुटिला कद्रूः असाध्यं किमपि कार्यं वदामीति चिन्तयित्वा अमृतकलशम् आहृत्य मह्यं देहि। तदा त्वन्मातरं दास्यात् मोचयिष्यामीति

 In Public domain. Digitization Muthulakshmi Research Academy

कद्रूः उवाच। गरुडः अमृतारहणाय स्वमातुराशीः प्राप्य पितरं कश्यपम् उपागच्छत्। पाथेयाहारं तं पितरं पप्रच्छ। चिरकालं यावत् कलहायमानौ द्वौ गजकच्छपौ भक्षय येन सर्वेष्वपि बलाधिकः भविष्यसीति पिता पुत्रं गरुडम् उपदिदेश। ततः गरुडः ब्रह्मगिरिम् अधिशयानं रङ्गनाथम् उपागच्छत्। अनेन अमृतारहणप्रस्थानमिति षष्ठोऽध्यायः समाप्तिमेति।

सप्तमोऽध्यायः अमृतकलशाहरणम् - 73 श्लोकाः

गरुडः रङ्गनाथं प्रणम्य कद्रूवाक्यं व्यजिज्ञपत्। विजयः त्वत्करस्थः मयोक्तं कवचं पठ नित्यं त्वामहं सर्वदा रक्षामीति रङ्गनाथः गरुडम् अवादीत्। रङ्गनाथं साष्टाङ्गं प्रणम्य गरुडः अमृतकलशाहरणाय प्रस्थितः। पितुः उपदेशानुसारं गजकच्छपौ आहृत्य भक्षणाय वालिखिल्यानां निलये वटे चिक्षेप गरुडः। तद्भारात् तरुशाखा भग्ना। भीत्या गरुडः तां वालखिल्याश्रितां शाखां गृहीत्वा गजकच्छपाभ्यां सह पितुरन्तिकमगमत्। कश्यपस्य प्रार्थनया वालखिल्याः यथास्थानं जग्मुः। तां शाखां विसृज्य मेरोः पार्श्वे गजकच्छपौ भक्षयित्वा अतृप्तः सन् पुनः पितुरन्तिकं जगाम। पितुरुपदेशात् दुष्टभिल्लैरावृतां फल्लीम् अभक्षयत् गरुडः। ततः तृप्तः गरुडः रङ्गनाथं हृदि ध्यायन् अमरावतीं प्रविवेश। अमरावती प्रवेशवर्णनमतीव रमणीयमस्ति। इन्द्रस्य भवनं प्राप्य स्वागमनहेतुं इन्द्राय निवेदयामास। इन्द्रः गरुडस्य परिहासं चकार। क्रोधाविष्टः गरुडः पयोमयं अग्निमयं परिखं सर्पशस्त्रसमाकीर्णं प्राकारं अमृत कलशस्य रक्षणस्थलं ददर्श। रक्षिणः विदार्य सुधास्थलं प्रविवेश विनतासुतः। रङ्गनाथकवचेनाभि रक्षितः गरुडः केनाप्यबाधितः अमृतकलशं जग्राह। वृत्तमिदं विज्ञाय इन्द्रः युद्धाय सेनावृतः जगाम। अस्त्राणि भिन्दन् शत्रून् विदारयन् गरुडः प्रतिभटनं चकार गरुडः। अपिच इन्द्रेण क्षिप्तं वज्रमपि कुसुमवत् मृदुतां प्राप। अष्ट दिक्पालाः अपि पलायनं चक्रुः। इन्द्रोपि पलायितः। ततः अमृत कलशं नीत्वा गरुडः रङ्गनाथाय निवेदयामास। अनेन प्रसङ्गेन समाप्तिमेति सप्तमोऽध्यायः।

In Public domain. Digitization Muthulakshmi Research Academy

अष्टमोऽध्यायः विनतादास्यमोक्षणम् - 68 श्लोकाः

पराजितः इन्द्रः गुरोः बृहस्पतेः उपदेशेन रङ्गेन्द्रस्य शरणं ययौ। रङ्गनाथः तदा गरुडम् अवदत् यत् अमृतकलशं प्राप्य कद्रूः अवश्यं स्वपुत्रेभ्यः दास्यति। तेन सर्पाः अवधर्हाः भवन्ति। जगत् नंक्ष्यति। अतः उपायेन मातरं मोचय। कद्रूहस्ते अमृतकलशं समर्प्य अशुचीभूतैः अस्पृश्यमिदं कलशमिति उक्त्वा मातरं नीत्वा अन्यत्र गच्छ। प्राप्तावसरः इन्द्रः अमृतकलशं स्वस्थानं नेष्यति। प्रतीकारः कपटीनां कपटेनैव युज्यते। रङ्गनाथस्य आदेशम् अक्षरशः पालयित्वा मातरं दास्यात् मोचयित्वा पितरं कश्यपमुपागच्छत् गरुडः। दर्भेषु स्थापितं कलशम् आदाय इन्द्रः दिवं प्राप। कलशम् अदृष्ट्वा सर्पाः विनतासुतं पप्रच्छुः। युष्मदीयमान्द्यमेव कलशादर्शनस्य हेतुरिति गरुडः प्रत्युत्तरं ददौ। खिन्नाः सर्पाः दर्भेषु पतितां सुधां लिलिहुः। तेन तेषां जिह्वा द्विधा व्यशीर्यत। सर्पाणां द्विजिह्वता तदारभ्य प्रख्याताभूत्। नागेषु गरुत्मतः विद्वेषोपि तदारभ्य जातः। स्वर्गं प्रतिगच्छतां देवानां हस्तगतात् अमृत कलशात् सुधा किञ्चित् ब्राहमनदे न्यपतत् इति हेतोः ब्राह्मनदस्य सुधामुखमिति नामान्तरेणापि ख्यातिरजायत। पितृभ्यां साकं रङ्गनाथम् आराधयन् ब्रह्मगिरौ उवास गरुडः। अनेन प्रसङ्गेन विनतादास्यमोक्षणिति अष्टमोऽध्यायः समाप्तिमेति।

नवमोऽध्यायः सर्वक्षेत्रवर्णनम् - 27 श्लोकाः

कुशपौत्रः श्रुत्वेमं वृत्तं गरुडाचलं परितः यानि क्षेत्राणि सन्ति तेषां कथां ब्रूहीति नारदं प्रार्थयामास।

कुरुपतिक्षेत्रम् राजा भरतः धौम्यमुखात् काश्यपक्षेत्रमाहात्म्यं श्रुत्वा अस्मात् योजनद्वयमात्रे रङ्गनाथं ध्यायन् तपस्तेपे। प्रसन्नः हरिः तत्राविरासीत्। कुरुपतिक्षेत्रमिति तस्य प्रथाभवत्। गिरिमपि कुरुपतिगिरिरति व्यवहरन्ति भक्ताः। कुरुपतिक्षेत्रमधिकृत्य होसदुर्गं कृष्णमाचार्यः श्रीनिवासविलास चम्पू प्रबन्धं रचयामास यस्य मुद्रणं संस्कृत अकाडमी पूर्वमेव अकार्षीत्। दिव्यपादुकास्वीकरण महोत्सवः रमणीयतया कविना वर्णितः।

 In Public domain. Digitization Muthulakshmi Research Academy

श्रीनिवासदेवालयः- इतः उत्तरतः योगिना भरद्वाजेन कृतेन तपसा सन्तुष्टः श्रीनिवासाकृतिः हरिः तं योगिनं तोषयामास।

नरसिंहदेवालयः- इतः प्राच्यां तपस्यन्तं प्रह्लादं तोषयन् हरिः दिव्यसिंहाकृतिं धृत्वा सिंहाद्रौ प्रादुरास।

अक्रूरक्षेत्रम् – बालकृष्णः -अक्रूरः द्वापरान्ते सर्वक्षेत्रं समेष्यति। रङ्गनाथक्षेत्रं प्राप्य यदुनन्दनरूपेण तस्य दर्शनम् अयाचत। ईशान्यां दिशि कोशार्धे हरिः श्रीरङ्गनाथः बालकृष्णरूपं दर्शयित्वा अक्रूरम् अन्वग्रहीत्। अतः तत्स्थानं अक्रूरक्षेत्रमिति प्रसिद्धिम् अवाप। नारदः इत्थं रङ्गनाथक्षेत्रं परितः विद्यमानानि दिव्यक्षेत्राणि कुशपौत्रप्रार्थनया वर्णयामास।

दशमोऽध्यायः – 28 श्लोकाः

नारदमुखात् रङ्गनाथदिव्यकथां श्रुत्वा मुनयः कुशपौत्रः महावीरश्च प्रीताः। रङ्गनाथप्रीत्यर्थं गोभूस्वर्णानि समर्प्य उत्सवान् विविधांश्चक्रे। निजदेशं गत्वा श्रीरङ्गनायकं ध्यायन् रामायणं श्रुण्वन् पुत्रान् प्राप्य यज्ञैः इष्ट्वा राज्यं तनये निक्षिप्य धर्मपत्न्या पुनः उत्तररङ्गं प्राप्य बहून् वर्षान् रङ्गनाथम् आरराध। रङ्गनाथचरितं यः पठेत् श्रुणुयात् तस्य अखिलार्थः करगत इति श्रीमदुत्तररङ्गमाहात्म्यं वर्णयित्वा कृष्णकविः काव्यं परिसमाप्नोति।

काव्यतत्त्वानि - अनुष्टुब्वृत्तेनैव प्रायः सर्वे श्लोकाः ग्रथिताः। शब्दलङ्काराः अर्थालङ्काराश्च काव्यसौन्दर्यवर्धकास्सन्ति। रमणीयं सहजप्रकृति वर्णनं पाठकहृदयम् आह्लदयति।

सालैस्तालैस्तमालैश्च, तमालसालाम्ररसालवञ्जुल[13] इत्यादि श्लोकेषु लकारस्य आवृत्तिरस्तीत्यतः अत्र प्रासालङ्कारः प्रयुक्तः।

श्वेतच्छत्राणि[14] इत्यस्मिन् श्लोके पुण्डरीकाणि उपमेयं श्वेतच्छत्राणि उपमानम् स्फुटत्वं साधारणधर्मः इव उपमावाचकं उपमायाः सर्वे तत्त्वानि सन्तीत्यतः

---

[13] उ.र.म. 4.15, 44

In Public domain. Digitization Muthulakshmi Research Academy

उपमालङ्कारप्रयोगः। अलङ्कारप्रयोगः काव्यचारुतावर्धकोस्तीति कथने नास्ति सन्देहलेशः।

रचनाशैली 'पार्वती उवाच'। 'ईश्वर उवाच।'

'यद्विवक्षुरहं पृष्टः भवत्यापि तदेवहि ।
श्रूयतां देवि वक्ष्यामि महावीरस्य वैभवम्' ।। 2 ।।

'इति श्रीमद्भविष्योत्तरपुराणे उमामहोश्वरसंवादे ।
उत्तररङ्गमाहात्म्ये महावीरप्रश्नो नाम प्रथमोऽध्यायः'

इत्येतानि वाक्यानि पुराणरचनाशैलीम् अनुसृत्य कृष्णमाचार्यः उत्तररङ्गमाहात्म्यं रचयामास इति प्रमाणयन्ति ।

सूक्तयः- कृष्णकविकृतसूक्तयः काव्यसौन्दर्यं वर्धयन्ति। पाठकहृदि चमत्कारं जनयन्ति च।

प्रवर्तते सत्कथैव सत्सङ्गाज्जगतीतले ।।
दुस्सङ्गाद्दुष्टवृत्तानां श्रवणं भवति ध्रुवम् [15]।
कार्या गुरुजनस्याज्ञा दुष्टापि मतिशालिभिः ।
कष्टं कष्टं महाभाग भूमावकपटात्मनाम् ।
दुष्टैः कपटचेतोभिस्सहवासो महीपते[16] ।
कष्टा हि दुष्टैस्सह सङ्गतिर्भुवि[17] ।
सर्वास्ववस्थासु त्वरा कार्यविघातिनी[18] ।
किन्नु खेदावहं पुंसां धीराणां परसेवनात् ।
यादृशस्तादृशो वास्तु लघुर्मर्त्यः पराश्रयात्[19]।

---

[14] उ.र.ण.5.13
[15] 1-59, 60
[16] 2-45, 50
[17] 2 51
[18] 3- 19

काहमल्पमतिः क्वासौ रङ्गेशः करुणानिधिः[20]
वार्यते ह्यन्धतमसं बालेनापि विवस्वता ॥
ज्ञानवृद्धो हि वृद्धेषु श्रेष्ठस्सद्भिः प्रगण्यते ॥
बालानां मातुराशीस्सुखावहा ॥
मातुर्वात्सल्यतो लोके नान्यन्मन्येऽधिकं नृप[21] ॥
कथयन्ति भुवि प्राज्ञा आलस्यादमृतं विषम् ॥
आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः ।
क्षिप्रमक्रियमाणस्य कालः पिबति सम्पदः ॥
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम् ॥
दुरात्मनां च ज्ञातीनां हर्षणात्किन्नु ते फलम् ॥

ज्ञातयो ये दुरात्मानस्तेषु नार्हा दया क्वचित् ।
व्याधीनां वर्तमानानां दयते को नु बुद्धिमान् ॥

न दया तेषु कर्तव्या प्रणता इति सत्तम ।
बुद्धिमान् ज्ञातिवर्गांस्तान् हन्यादेव दुरात्मनः ॥

ज्ञातिर्बालोऽपि नोपेक्ष्यस्सर्वं व्याप्नोत्यतः परम् ।
स्वल्पोऽप्यग्निर्वनं सर्वं गरुत्मन् दहति क्षणात् ॥

रूढमूलो भवेद्ज्ञातिर्बाल्ये स्यादद्युपेक्षितः ।
विषवृक्षो यथा सस्यदशायां समुपेक्षितः ॥

कृपालवो महात्मानो यदिच ज्ञातयो भुवि ।
जीवन्तऽन्योन्यमाश्रित्य ते द्रुमा वनजा इव ॥

दुरात्मानस्तु पक्षीन्द्र महात्मानमपि क्षणात् ।
उद्युञ्जते पातयितुं दायादं विषपुष्पवत् ॥

---

[19] 4-7
[20] 5- 52
[21] 6- 50, 51, 60, 63

महात्मना दुरात्मानो रक्षिता अपि सत्तम ।
तमेव समये घ्नन्ति दुष्टास्सर्पा इव क्षणात्॥

प्रतीकारः कपटीनां कपटेनैव युज्यते[22]॥
संसर्गो हि सतां श्रेष्ठस्सर्वपुण्यफलप्रदः॥
अनुग्रहाद्धि विदुषां महतां मुनिसत्तमाः॥
अकृष्टपच्यतां याति सर्वा सिद्धिरपि क्षणात्[23]॥

व्याकरणप्रयोगविशेषाः

'मन्यकर्ण्यनादरे विभाषाप्राणिषु'[24]।इति पाणिनिसूत्रस्य उदाहरणम् आदृत्य कविः तत्र तत्र चमत्कारजनकान् प्रयोगान् चकार।

अमृताहरणं वीर तृणाय मनुते स्म सः॥
तृणाय मेने देवेशमपि दिव्यपराक्रमः[25]॥

'अप्राणिष्वित्यपनीय नौकाकान्नशुकश्शृगालवर्ज्येष्विति वाच्यम्'। (वार्तिकम्)
तं वीक्ष्य क्रोधताम्राक्षश्शुने **मत्वामराधिपम्** ।मन्यतेः कर्म तृणम् तिरस्कारे गम्यमाने चतुर्थी भवति। अतः तृणाय इति चतुर्थ्यन्तं प्रयुक्तम्। तथैव शुने इति वार्तिकमनुसृत्य चतुर्थ्यन्तं प्रयुक्तम्।
कवेः व्याकरणवैदुष्यं प्रमाणयन्ति ईदृशाः प्रयोगाः।

कार्तज्ञ्यसमर्पणम्

उत्तररङ्गमाहात्म्यं चपेटाहतिस्तुतिश्च इति काव्यद्वयस्य प्रतिं प्रदाय निस्तुलमुपकृतवद्भ्यः आन्ध्रभाषाविद्वद्भ्यः **डां. वैद्यं वेङ्कटेश्वराचार्येभ्यः** सविनयं कृतज्ञतां निवेदयामि। यस्य प्रचोदनेन काव्यसम्पादने आमुखलेखने च साफल्यं प्राप्तं तस्मै, संस्कृत अकाडमी कार्यालयस्य निदेशकाय प्राचार्याय

---

22 8 - 8, 9, 19, 27, 29, 30, 31, 32, 33, 34, 41
23 10 -2, 4, 5
24 अष्टाध्यायी II – 3 - 7
25 6 – 56, 58

 In Public domain. Digitization Muthulakshmi Research Academy

के.नीलकण्ठमहाभागाय सविनयं कार्तज्ञ्यं समर्पयामि। सम्पादनकर्मणि साहाय्यम् आचरितवतः विदुषः जोषि भरद्वाजस्य अभिवृद्धिं कामयमानाऽहं तम् अभिनन्दामि। काव्यस्य क्लिष्टम् उट्टङ्कनकार्यम् अङ्गीकृत्य माम् उपकुतवते श्रीमते सामलमोहनमहोदयाय कृतज्ञतां समर्पयामि। उस्मानिया-विश्वविद्यालयस्य उपकुलपतिभ्यः प्राचार्येभ्यः डि. रवीन्दरमहाभागेभ्यः केन्द्रीयसंस्कृतविश्वविद्यालयस्य उपकुलपतिभ्यः श्रीनिवासवरखेडि महोदयेभ्यश्च कार्तज्ञ्यम् आविष्करोमि।

इति बुधजनविधेया
डॉ. वरलक्ष्मीः
उपनिदेशिका

In Public domain. Digitization Muthulakshmi Research Academy

वनपर्त्तिश्रीरङ्गापुरस्थः श्रीरङ्गदेवालयः - श्रीरङ्गनाथः



In Public domain. Digitization Muthulakshmi Research Academy

होसदुर्गं कृष्णकविरचितं देवालयगोपुरशिलाशासनम्

होसदुर्गं कृष्णकविरचितं श्रीरङ्गनाथदेवालयमण्डपशिलाशासनम् प्रथमभागः (Inscriptions of Andhrapradesh, Mahabubnagar District, vol.II, 2003. Published by Department of Archaeology & Museums, Govt. of Andhrapradesh, Hyd, edited by Dr. N.S. Ramachandra Murthy & Dr. P. Joginaidu)

होसदुर्ग कृष्णकविरचितं श्रीरङ्गनाथदेवालयमण्डपशिलाशासनम् द्वितीयभागः



In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

॥ शुभमस्तु ॥

श्री हयग्रीवाय नमः

श्रीमते श्रीनिवासब्रह्मतन्त्रपरकालमहादेशिकाय नमः ।

श्रीमदुत्तररङ्गेशाय नमः ।

श्रीमान् गारुडभूमीभृद्धामा कामारिवन्दितः ।
मङ्गलं रङ्गनाथो मे तुङ्गतुङ्गन्तरङ्गयेत् । ।

पार्वत्युवाच

श्रुत्वा रामायणकथां महावीरो महामतिः ।
अत ऊर्ध्वं किमकरोत्तन्मे ब्रूहि दयानिधे ॥ 1 ॥

ईश्वर उवाच

यद्विवक्षुरहं पृष्टः भवत्यापि तदेवहि ।
श्रूयतां देवि वक्ष्यामि महावीरस्य वैभवम् ॥ 2 ॥

श्रीमानेष ततश्श्रुत्वा दिव्यां रामकथां शुभाम् ।
कुशपौत्रो मनश्चक्रे रामसेतोर्विलोकने ॥ 3 ॥

राज्यं मन्त्रिणि निक्षिप्य समारुह्य रथोत्तमम् ।
गृहीत्वाल्पपरीवारं यात्रायामासक्तमानसः ॥ 4 ॥

सरय्वामथ गङ्गायां कालिन्द्यां च महामतिः ।
गोदावर्यां भीमरथ्यां कृष्णायामपि भक्तितः ॥ 5 ॥

स्नात्वाथ तुङ्गभद्रायां पिनाकिन्यां ततः परम् ।
कावेर्यां कपिलायां च प्राप रत्नाकरं ततः ॥ 6 ॥

ततो ददर्श विपुलं तुङ्गवीचिभिराकुलम् ।
मत्स्यकच्छपसम्बाधं नानापर्वतबन्धुरम् ॥ 7 ॥

रामपातितलं केन्द्रकेतुदण्डानुकारिणा ।
महापातकनिर्भेदपरिघायितमूर्तिना ॥ 8 ॥

In Public domain. Digitization Muthulakshmi Research Academy

रघुवीरयशश्छत्रनीलदण्डायितात्मना ।
लङ्काम्बुजजिघृक्षोर्भूकरिण्यः कररूपिणा ॥ 9 ॥

विभीषणमहाबुद्धिलतोपघ्नायितात्मना ।
सेतुना रामभद्रस्य सीमन्तितमहाजलम् ॥10 ॥

क्वचिद्भिण्डीरखण्डाढ्यं क्वचिद्द्रुममेदुरम् ।
क्वचिदावर्तगर्ताढ्यं दृष्वा जलनिधिं नृपः ॥ 11 ॥

स्नात्वा संस्मृत्य रामस्य वृत्तं विस्मितमानसः ।
दत्वा स बहुधा वित्तं ब्राह्मणेभ्य उदारधीः ॥ 12 ॥

उवास कतिचिन्मासांस्तत्र वीरो महामतिः ।
श्रृण्वन् रामायणं नित्यं राममेवानुकीर्तयन् ॥ 13 ॥

ततो गत्वा ताम्रपर्णीं स्नात्वा तत्र यथाविधि ।
संसेव्य दिव्यक्षेत्रेषु पुण्डरीकाक्षमच्युतम् ॥ 14 ॥

प्राप श्रीरङ्गनगरीम् उच्चैरामुक्तकेतनाम् ।
तां नित्योत्सवसम्पूर्णां हृष्टपुष्टजनाकुलाम् ॥ 15 ॥

रङ्गभूकामिनीभूषामुक्ताहारायितात्मना ।
झरीयुगेन कावेर्यास्तादृशा परिवारिताम् ॥ 16 ॥

प्रविश्याथ कृतस्नानो राजपुष्करिणीजले ।
ददर्श स विमानाग्रे वासुदेवं परात्परम् ॥ 17 ॥

ततश्शेषे शयानं तं पुण्डरीके मिलिन्दवत् ।
भगवन्तं रङ्गनाथं ददर्श परया मुदा ॥ 18॥

तमासेव्य ततस्स्तुत्वा काञ्चीं प्राप्य ततः परम् ।
वपापरिमलोल्लासवासिताधरपल्लवम् ॥ 19 ॥

In Public domain. Digitization Muthulakshmi Research Academy

फलं विरिञ्चियज्ञस्य देवदेवं जगत्पतिम् ।
ददर्श वरदं धीमान् कुशपौत्रो महामतिः ॥ 20 ॥

अदक्षेत्राणि संसेव्य तत्राष्टादश भूपतिः ।
शेषाद्रिं प्राप्य तेजस्वी भगवन्तं रमासखम् ॥ 21 ॥

नीलाम्बुदनिभाकरं पुण्डरीकायतेक्षणम् ।
श्रीनिवासं जगन्नाथं कालं कञ्चिदसेवत ॥ 22 ॥

ततो गत्वा नृसिंहं च संसेव्य घटिका च ते ।
ततः प्राप्य महावीरो मध्यमं रङ्गमुत्तमम् ॥ 23 ॥

तत्र संसेव्य रङ्गेन्द्रमादिरङ्ग इव स्थितम् ।
क्षेत्रेषु तत्र तत्राथ सिषेवे स जगत्पतिम् ॥ 24 ॥

अथ प्राप महातेजाः पश्चिमं रङ्गमन्दिरम् ।
तन्महद्गौतमक्षेत्रं कावेरीपरिवारितम् ॥ 25 ॥

तत्र संसेव्य रङ्गेन्द्रमादिरङ्ग इव स्थितम् ।
शयानं भोगिशयने गौतमस्य तपः फलम् ॥ 26 ॥

यादवाद्रिं ततः प्राप्य साक्षाच्छेषात्मकं गिरिम् ।
स्नात्वा कल्याणसरसि जले पापविनाशने॥ 27 ॥

प्राच्यां वराहं संसेव्य सीतारण्यं च दक्षिणे ।
अज्ञानवारकं नाम प्रत्यगश्वत्थपादपम् ॥ 28 ॥

पञ्चभागवतक्षेत्रं तत्रैवासेव्य भूपतिः ।
ततः प्रदक्षिणीकृत्य तीर्थं तं रघुनन्दनः ॥ 29 ॥

अष्टतीर्थ्यां ततस्स्नात्वा परिधानशिलामपि ।
दृष्ट्वा कल्याणसरसि पुनस्स्नात्वा यथाविधि ॥ 30 ॥

 In Public domain. Digitization Muthulakshmi Research Academy

आनन्दमयसंज्ञेऽथ विमाने ब्रह्मणारार्चिते ।
ददर्श पुण्डरीकाक्षं साक्षान्नारायणं हरिम् ॥ 31 ॥

ब्रह्मणाराधितं पूर्वं सनाकादि तपःफलम् ।
पूजितं रामचन्द्रेण कृष्णेनापि यशस्विना ॥32 ॥

अष्टाक्षरमहामन्त्रदैवतं घनसुन्दरम् ।
रामप्रियं च संसेव्य ततः कृत्वा प्रदक्षिणम् ॥ 33 ॥

विलोक्य जलधेः पुत्रीं सर्वसम्पत्समृद्धिदाम् ।
संसेव्य नरसिंहं च प्रह्लादस्य तपः फलम् ॥ 34 ॥

ततो वेलापुरीभागे केशवं वीक्ष्य भूपतिः ।
नत्वा पिनाकिनीतीरे नरसिंहपदाम्बुजम् ॥ 35 ॥

संसेव्याहोबलक्षेत्रे नरसिंहं जगत्पतिम् ।
वेगेन समतिक्रम्य तुङ्गभद्रां महामतिः ॥ 36 ॥

ततो ददर्श विपुलां दिव्यां शीतजलां नदीम् ।
कुमुदोत्पलकल्हारसरसीरुहभूषिताम् ॥ 37 ॥

लक्ष्मीशमनुकुर्वन्तीं कृष्णां तृष्णापहारिणीम् ।
स्नात्वा तत्र पयःपूरे नियतात्मा महीपतिः ॥ 38 ॥

गव्यूतिमात्रं पन्थानमतिचक्राम राघवः ।
तत्राथ तुङ्गश्रृङ्गाढ्यं नानाद्विजमृगायुतम् ॥ 39 ॥

चूतैः पटीरैः पनसैर्निम्बैर्नीपैश्च केसरैः ।
चम्पकैरपि चाम्पेयैः कोविदारैश्च वञ्जुलैः ॥ 40 ॥

दाडिमैः कुरवैश्चैव तिन्त्रिणीभिः पलाशकैः ।
करवीरैर्नारिकेलैस्तमालैः कृतमालकैः ॥ 41 ॥

पुष्पितैः फलितैर्वृक्षैस्सर्वतः परिवारितम् ।
क्रौञ्चबर्हिणसङ्घुष्टं शान्तसत्वशताञ्चितम् ॥ 42 ॥

गुहासु तत्रतत्राथ क्रीडद्भिस्सिद्धकिन्नरैः ।
अलङ्कृतं पर्वतेन्द्रं कञ्चिदेष ददर्श ह ॥ 43 ॥

अविदूरे तस्य गिरेर्नदे स्नात्वा महीपतिः ।
जजाप परमं जप्यं कञ्चित्कालं मुदान्वितः ॥ 44 ॥

अथ शुश्राव निनदं तूर्यदुन्दुभिसम्भवम् ।
ज्ञात्वा तद्भगवत्क्षेत्रमारुरोह गिरिं नृपः ॥ 45 ॥

ततो ददर्श तत्र भोगीन्द्रे शयानं रङ्गनायकम् ।
श्रीभूमीकरपद्माभ्यां संवाहितपदाम्बुजम् ॥ 46 ॥

विभूषितं महाहारैर्घनाघननिभप्रभम् ।
यथादिरङ्गे मध्ये च पश्चिमे रङ्गमन्दिरे ॥ 47 ॥

तथाविधं तं संवीक्ष्य विस्मितोऽभूद्धरापतिः ।
अन्यादृशं तत्सौन्दर्यं दृष्ट्वा हृष्टतनूरुहः ॥ 48 ॥

सेवमानांस्ततस्तत्र पप्रच्छ मुनिसत्तमान् ।
। राजा ।
मुनयः किमिदं क्षेत्रं कस्य पुण्यफलादिह ॥ 49 ॥

अविरास जगन्नाथः कोटिमन्मथसुन्दरः ।
न दृष्टमीदृशं क्वापि सोन्दर्यं जगतीतले ॥ 50 ॥

धन्योऽस्म्यनुग्रहीतोऽस्मि सेवयाऽस्य रमापतेः ।
सर्वं ब्रूथ महाभागाः पृच्छते मेऽद्य सादरम् ॥ 51 ॥

यथावदादितो वृत्तं रङ्गनाथस्य सत्तमाः ।
ईश्वरः ।

In Public domain. Digitization Muthulakshmi Research Academy

इत्युक्ता मुनयस्सर्वेऽप्यब्रुवन् धरणीपतिम् ॥ 52 ॥

मुनय ऊचुः-

गरुढस्य तपश्चर्यासन्तुष्टमनसा पुरा ।
साक्षान्नारायणेनैव तस्मै दत्तमिदं नृप ॥ 53 ॥

विमानं रङ्गनाथस्य विद्धि क्षेत्रमिदं महत् ।
श्रीमदुत्तररङ्गाख्यं गिरिञ्च गरुडाह्वयम् ॥ 54 ॥

इमं सुधामुखं प्राहुर्नदं च नृपसत्तम ।
अस्य क्षेत्रस्य माहात्म्यं यद्यास्था श्रोतुमस्ति ते॥ 55 ॥

क्षणं तिष्ठ महाभाग विद्मस्त्वां नृपसत्तमम् ।
राघवस्यान्वये जातं महासत्वगुणोत्तरम् ॥ 56 ॥

सेवार्थमिह देवस्य नारदोऽप्यागमिष्यति ।
तन्मुखेनैव सर्वं त्वं श्रोतुमर्हसि भुपते ॥ 57 ॥

वयं चापि भगवत्सङ्गाद्धन्यास्स्यामाद्य सुव्रत ।
प्रवर्तते सत्कथैव सत्सङ्गाज्जगतीतले ॥ 58 ॥

दुस्सङ्गाद्दुष्टवृत्तानां श्रवणं भवति ध्रुवम् ।
अतो निषीद राजेन्द्र क्षणमत्र समाहितः ॥ 59 ॥

ईश्वरः

इति किल गदितो मुनिव्रजैस्तैर्मुदितमना नृपसत्तमस्तदानीम् ।
गिरिभुवि निषसाद तैर्वृतोऽयं मुनिनिवहै रघुनन्दनो यथाप्राक् ॥ 60॥

इति श्रीमद्भविष्योत्तरपुराणे उमामहोश्वरसंवादे ।
उत्तररङ्गमाहात्म्ये महावीरप्रश्नो नाम प्रथमोऽध्यायः ॥

In Public domain. Digitization Muthulakshmi Research Academy

॥ श्रीमदुत्तररङ्गेशाय नमः ॥

ईश्वरः

ततो व्योम्नि महत्तेजस्तादृशं समजायत ।
यथा मर्त्या विजानीयुस्सुधाकरशतोदयम् ॥ 1 ॥

तद्दृष्ट्वा मुनयस्सर्वे सम्प्रहृष्टतनूरुहाः ।
तेन साकं समुत्थाय राज्ञा प्राञ्जलयोऽभवन् ॥ 2 ॥

ततः करतले दिव्यां वीणां सपदि वादयन् ।
गायन्नारायणं देवं नारदः प्रादुरास ह ॥ 3 ॥

आगतं नारदं दृष्ट्वा सर्वे ते मुनिसत्तमाः ।
पुलस्त्यः पुलुहश्चैव प्रचेता अपि गौतमः ॥ 4 ॥

कात्यायनोऽथ जाबालिस्सु यज्ञो विजयोऽपि च ।
एते चान्ये च मुनयो राजा च रघुनन्दनः ॥ 5 ॥

प्रणेमुस्सहसा भूमौ साष्टाङ्गं भक्तिनिर्भराः ।
अथ दृष्ट्वा मुनीन् सर्वान् देवर्षिर्नारदोऽपि च ॥ 6 ॥

आपृच्छ्य कुशलं सर्वानग्रेऽपश्यद्धरापतिम् ।
हृष्टान्तरङ्गस्तं दृष्ट्वा पप्रच्छ कुशलं तदा ॥ 7 ॥

नारदः –

कश्चित्ते कुशलं राजन् कश्चिद्धर्माश्च रक्षिताः ।
कश्चिन्महीं पालयसि धर्मेण सुसमाहितः ॥ 8 ॥

आगतोऽसि कुतो हेतोरिह राजर्षिसत्तम ।
वक्तुमर्हसि सर्वम्मे ककुत्थ्सकुलनन्दन ॥ 9 ॥

ईश्वरः –

इत्युक्तो नारदेनाथ महावीरः प्रतापवान् ।

In Public domain. Digitization Muthulakshmi Research Academy

कृताञ्जलिपुटो राजा सर्वं व्यज्ञापयत्तदा ॥ 10 ॥

राजा-

श्रुत्वा रामायणकथां सेतुं द्रष्टुं समुत्सुकः ।
आगतोऽस्मि महाभाग दृष्टः सेतुर्मयानघः ॥ 11 ॥

रङ्गादिदिव्यक्षेत्राणां यात्रा च समजायत ।
इहागत्य विलोक्यैनं देवेशं विस्मितोऽभवम् ॥ 12 ॥

अस्य क्षेत्रस्य महात्म्यं श्रोतुं त्वद्वदनाम्बुजात् ।
काङ्क्षन्निह प्रतीक्षेऽहं भवदागमनं मुने ॥13 ॥

आगतोऽसि त्वमप्यद्य दिव्यमत्रत्यवैभवम् ।
वक्तुमर्हसि सर्वज्ञ कृपया मय्यनन्यया ॥ 14 ॥

ईश्वरः –

श्रुत्वैतद्वचनं देवि नारदो मुनिसत्तमः ।
तदा मुनिसभामध्ये वक्तुं समुपचक्रमे ॥ 15 ॥

नारदः –

साधु पृष्टं महाभाग महाभागवतोत्तम ।
नारायणचरित्रस्य को नु तृप्तो भवेदिह ॥ 16 ॥

यूयं शृणुत सर्वेऽपि मुनयो भगवत्कथाम् ।
दिव्यां वदामि राजेन्द्रः पृच्छत्येष महातपाः ॥ 17 ॥

इत्याख्याय मुनीन् सर्वान् श्रीरङ्गेन्द्रं प्रणम्य च ।
आचम्य वादयन् वीणां रङ्गमाहत्म्यमब्रवीत् ॥ 18 ॥

राजर्षे शृणु मारीचः कश्यपः प्राक् श्रुतो भवेत् ।
तस्यैव विनताकद्रूरिति पत्न्यौ बभूवतुः ॥ 19 ॥

यैषा गरुत्मतो माता विनता सा प्रकीर्तिता ।
आशीविषाणां माता या सा कद्रूरिति कथ्यते ॥ 20 ॥

कदाचित्ते उभे देव्यौ सपत्न्यावम्बुधेस्तटम् ।
प्राप्योच्चैश्श्रवसं तत्र दिव्यं ददृशतुर्हयम् ॥ 21 ॥

तं वीक्ष्य लीलया कद्रूरब्रवीद्विनतां तदा ।
सापत्न्यक्रोधतो नित्यमस्याः दास्यं विधित्सति ॥ 22 ॥

कद्रूः –
अपि दृष्टस्तुरङ्गोयं विनते ब्रूहि भामिनि ।
किं वर्णस्तुरगस्यास्य पुच्छस्सपदि भासते ॥ 23 ॥

विनता –
दुष्टपूर्वो महाभागे तुरगोऽयं नभस्सदाम् ।
पाण्डुरोऽसावब्धिजन्मा स्वच्छः पुच्छोऽस्य भासते ॥ 24 ॥

नारदः –
इत्युक्तवत्यां राजेन्द्र विनतायां ततःपरम् ।
कद्रूरालोचयामास क्षणं चित्ते सकैतवम् ॥ 25 ॥

नूनमद्य समायातः कालोऽस्या वञ्चनाय हि ।
वचनं कथमप्यस्या वितथीकृत्य माचिरम् ॥ 26 ॥

सदा दास्ये नियोज्यैनां सुखितात्मा भवाम्यहम् ।
इत्यालोच्य ततः कद्रूरिदमुत्तरमब्रवीत् ॥ 27 ॥

कद्रूः –
सर्वं सत्यं भवद्वाक्यं स्वच्छोऽयं तुरगस्सखि ।
किन्तु पुच्छो नील एव वाजिनोऽस्य विराजते ॥ 28 ॥

Public domain. Digitization Muthulakshmi Research Academy

विनता –

साधु वीक्षस्व भोः कद्रु स्वच्छः पुच्छोऽस्य रोचते ।

कद्रूः –

त्वमेव साधु वीक्षस्व कृष्णः पुच्छोऽस्य भामिनि ॥ 29 ॥

नारदः –

इति स्वं स्वं वचो देव्यौ साधयन्त्यौ परस्परम् ।

ते उभे च पणं तत्र चक्रतुर्मुनिसत्तमाः ॥ 30 ॥

विनता –

यद्यध्रुवं मद्वचनं तदाहं तव मन्दिरे ।

दास्यं वहाम्यानिधनं सत्योऽयं शपथो मम ॥ 31 ॥

कद्रूः –

यदि चास्मद्वचस्सुभ्रु वितथं तर्हि ते गृहे ।

आशरीरं विधास्यामि दास्यं सत्यमिदं वचः ॥ 32 ॥

इत्युक्तवत्यां सा कद्र्यां विनताप्यब्रवीत्पुनः

विनता –

अपि सत्यं वदन्तीं मां मिथ्यावाक्यैस्सुमध्यमे ॥ 33 ॥

सम्मोहयसि सापत्न्यविद्वेषः किमयं मयि ।

अथासत्यं यदीदं मे वचनं मञ्जुभाषिणि ॥ 34 ॥

गत्वा समीवं पश्यामस्सर्वं च ज्ञास्यते ततः ॥ 35 ॥

नारदः –

इत्युक्त्वा विनता गन्तुं कद्र्याः करमथाग्रहीत् ।

कद्रूरपि तदा चित्ते किञ्चिदेवमचिन्तयत् ॥ 36 ॥

सत्यमेवाब्रवीदेषा न सत्यं कथितं मया ।

गच्छामि चेत्तुरङ्गस्य समीपमहमद्य वै ॥ 37 ॥

ममैव वितथं वाक्यं भविष्यति ततो मया ।
एतस्या मन्दिरे दास्यं कथं कर्तुं हि शक्यते ॥ 38 ॥

इत्यालोच्याब्रवीत्कद्रूर्विनतामुत्तरं वचः ।
कद्रूः –
अस्तमेष्यति सुश्रोणि भानुमानद्य भामिनि ॥
श्वः प्रातरेनं पश्यामस्तमः प्रादुर्भवत्यहो ॥ 39 ॥

भगवान् कश्यपः कुप्येत्तत्रैव स्थीयते यदि ।
इति तां प्रणयेनैव निवार्य विनतां तदा ॥ 40 ॥

सम्प्राप्य नैजं भवनं कद्रूः पुत्रानुवाच ह ।
स्वच्छ उच्चैश्रवः पुच्छ उक्तो विनतयाद्य वै ॥ 41 ॥

मया तु कृष्ण इत्येव शपथो रचितो महान् ।
इदानीं तद्वच पथ्यं मद्वचो वितथीकृतम् ॥ 42 ॥

तद्यूयं बालकाः कृष्णा वाला भूत्वा मदाज्ञया ।
वर्तध्वमुच्चैश्रवसः पुच्छे भुजगसत्तमाः ॥ 43 ॥

एवं यदि ततो दास्यं विनता मे समेष्यति ।
अन्यथा निधनाद्दास्यं तस्याः कार्यं मयैव हि ॥ 44 ॥

अतो मातुर्ममोक्त्यैदं कर्तव्यमविचारतः ।
कार्या गुरुजनस्याज्ञा दुष्टापि मतिशालिभिः ॥ 45 ॥

नारदः –
इत्युक्तास्ते ततो मात्रा भुजगा अतिमेचकाः ।
वाला भूत्वा तुरङ्गस्य पुच्छे रेजुस्तदा क्षणात् ॥ 46 ॥

प्रातरुत्थाय कद्रूश्च तया विनतया सह ।
यथापूर्वं तत गत्वा सन्ददर्श च तं हयम् ॥ 47 ॥

In Public domain. Digitization Muthulakshmi Research Academy

कृष्णं पुच्छं तस्य दृष्ट्वा कद्रूस्सा मुमुदेतराम् ।
दृष्ट्वा सा दास्यभीत्यासीद्विनता विनता न वा ॥ 48 ॥

ततः कद्रूरुवाचैनां दास्यं कर्तव्यमित्युत ।
विनतापि ततो मुग्धा तदभ्युपजगाम ह ॥ 49 ॥

कष्टं कष्टं महाभाग भूमावकपटात्मनाम् ।
दुष्टैः कपटचेतोभिस्सहवासो महीपते ॥ 50 ॥

इत्थं हि कद्र्या विनतापि वञ्चिता विचिन्त्य दैवं प्रतिकूलमात्मन
आजन्मनो दास्यमथातनो दियं कष्टा हि दुष्टैस्सह सङ्गतिर्भुवि ॥ 51

इति श्रीमद्भविष्योत्तरपुराणे श्रीमदुत्तररङ्गमाहात्म्ये विनतादास्यकथनं नाम द्वितीयोऽध्यायः ।

In Public domain. Digitization Muthulakshmi Research Academy

॥ श्रीमदुत्तररङ्गेशाय नमः ॥

राजा –

किमकारि महाभाग ततो विनतयानया ।
निवसन्त्या तत्र दास्ये तन्मे ब्रूहि महामुने ॥ 1 ॥

रुद्रः

इत्युक्तस्तेन राज्ञाथ नारदस्स महातपाः ।
दाक्षायणि तदा सर्वं वक्तुं समुपचक्रमे ॥ 2 ॥

नारदः –

ततो दास्ये वसन्ती सा कश्यपं दयितं निजम् ।
दृष्ट्वाभिवन्द्य सर्वं तत्कद्र्या वृत्तं व्यजिज्ञिपत् ॥ 3 ॥

तच्छ्रुत्वा कश्यपो धीमान् अधर्म्यं दुस्सहं तदा ।
कद्र्या दुश्चेष्टितं भार्यामिदं वचनमब्रवीत् ॥ 4 ॥

कश्यपः –

देवि नात्र भयं कार्यमुपदेक्ष्यामि तेऽनघे ।
सुमहामन्त्रमेतेन तव सर्वं च सिद्ध्यति ॥ 5 ॥

अद्य गर्भवती त्वं हि विनते मृदुभाषिणि ।
इह गर्भे प्रजायेते द्वे अण्डे तनुमध्यमे ॥ 6 ॥

अथ वर्षसहस्रं त्वं परिपालय ते उभे ।
अमुना मन्त्रराजेन रक्षां कृत्वा शुचिस्मिते ॥ 7 ॥

तत्र द्वौ हि जनिष्येते महावीरौ महामती ।
तौ त्वां दास्यान्मोचयितुं शक्तौ दिव्यपराक्रमौ ॥ 8 ॥

पुरा कृष्णातटे क्वापि पर्वते ब्रह्मसंज्ञिते ।
तपस्यतो मे भगवानुपादिक्षदिमं मनुम् ॥ 9 ॥

In Public domain. Digitization Muthulakshmi Research Academy

सर्वदा सर्वजगतां नाथो नारायणस्स्वयम् ।
श्रीरङ्गनाथो मां पायान्निखिलापन्निवारकः ॥ 10 ॥

इति ध्यात्वा सनियमं नित्यं नियतमानसा ।
ओं नमो रङ्गनाथायेत्येतमष्टाक्षरं मनुम् ॥ 11 ॥

जप त्वं विनते तन्वि दुःखादस्माद्विमोक्ष्यसे ।
इति तां सान्त्वयामास कश्यपो दास्यदुःखिताम् ॥ 12 ॥

नारदः –
अथैषापि शुचीभूय विनता तं महामनुम् ।
जपन्त्येव तदा चक्रे कद्र्या दास्यं सुमध्यमा ॥ 13 ॥

केषुचिद्दिवसेष्विव मती तेषु महीपते ।
प्रासूत विनताऽप्यण्डे उभे शशिनिभानना ॥ 14 ॥

ततस्तेनैव मन्त्रेण कृत्वा रक्षां तयोस्तदा ।
पत्युराज्ञां पुरस्कृत्य ररक्षाहानि कानिचित् ॥ 15 ॥

तन्मध्य एव चापल्याद्विनता स्त्रीस्वभावजात् ।
कीदृशस्स्यात्पुत्र इति द्रष्टुं कौतूहलान्विता ॥ 16 ॥

बभञ्जाण्डं तयोरेकं तत्रापश्यत्तनूभवम् ।
अपूर्णविग्रहं वर्षसहस्रापरिपूरणात् ॥ 17 ॥

वीक्ष्यानूरुं तनूजं तं जातोद्वेगा बभूव ह ।
उद्विग्नां तां स संवीक्ष्य पुत्रो वचनमब्रवीत् ॥ 18 ॥

अनूरुः –
अम्ब सर्वास्ववस्थासु त्वरा कार्यविघातिनी ।
अत एवं मा कृथास्त्वं जातोऽहं विकलाङ्गकः ॥ 19 ॥

In Public domain. Digitization Muthulakshmi Research Academy

न शक्तस्त्वामहं त्रातुमण्डमेतच्छुचिव्रते ।
रक्षासहस्रवर्षाणां तन्मध्ये मा कुरु त्वराम् ॥ 20 ॥

अथ वर्षसहस्रान्ते मन्त्रमाहत्म्यतस्तव ।
महासत्त्वो महातोजा जायते तनुजो ध्रुवम् ॥ 21 ॥

स त्वां मोचयिता दास्यादित्युक्त्वा दैवतोत्तमैः ।
आमन्त्रितो भानुमतश्चक्रे सारथ्यमुत्तमम् ॥ 22 ॥

अनूरुसारथिं प्राहुस्तदाप्रभृति पूषणम् ।
विनतापि तदा तन्वी नियतात्मा ररक्ष तत् ॥ 23 ॥

ततः कदाचिन्निद्रालौ विनतायां श्रियःपतिः ।
श्रीरङ्गनायकः प्राप्य स्वप्ने वचनमब्रवीत् ॥ 24 ॥

भगवान् –
जायते देवि पुत्रस्ते महात्मा मदनुग्रहात् ।
स त्वां मोचयिता नूनं मद्भक्तो भीरु मा शुचः ॥ 25 ॥

नारदः –
इत्युक्त्वां तर्हि ते देवे प्रबुद्धा विनता तदा ।
मुदा पूर्णान्तरङ्गासीद्रङ्गनाथोक्तिविस्मिताम् ॥ 26 ॥

पूर्णे वर्षसहस्रेऽथ भित्वाण्डं पूरविग्रहः ।
प्रादुरास विहङ्गेन्द्रो यथार्को मेघमण्डलात् ॥ 27 ॥

महाकायं महासत्वं सपक्षमिव पर्वतम् ।
काश्मीरजारुणाङ्गं तं कुटिलत्रोटिभासुरम् ॥ 28 ॥

बालचन्द्रोपमाभाभ्यां दंष्ट्राभ्यां च विराजितम् ।
सर्ववेदमयं धीरं दिव्यश्रीपरिपूरितम् ॥ 29 ॥

In Public domain. Digitization Muthulakshmi Research Academy

दृष्ट्वा हृष्टान्तरङ्गासीत्तनूजं विनतानिजम् ।
तेनैवाष्टाक्षरेणास्य रक्षां चक्रे पदे पदे ॥ 30 ॥

तेनापि साकं तनुजेन दास्यं चकार कद्र्या विनता नितान्तम् ।
तद्रङ्गनाथस्य वचो महार्घं स्वप्नोदितं सा परिचिन्तयन्ती ॥ 31 ॥

इति श्रीमदुत्तररङ्गममाहात्म्ये गरुडाविर्भावो नाम तृतीयोध्यायः

श्रीमदुत्तररङ्गेशाय नमः

नारदः –

अथ नित्यं वहन् सर्वान् महतो विनतात्मजः ।
मुहुरारोपयन् पृष्ठं मुहुरप्यवतारयन् ॥ 1 ॥

यत्र यत्र भुजङ्गास्ते यद्यदिच्छन्ति सर्वदा ।
तत्र तत्र समानीय तत्तद्भक्षयति स्म तान् ॥ 2 ॥

निगृहीतुं समर्थोऽपि तान् मात्राज्ञावशंवदः ।
त्रैलोक्यं चारयामास तदानीं स महाबलः ॥ 3 ॥

कस्यचित्त्वथ कालस्य दुःखितः परसेवया ।
पितुरन्तिकमासाद्य कश्यपस्य महामुनेः ॥ 4 ॥

सम्प्रणम्याभिवाद्याथ पितरं भक्तिमेदुरः ।
तस्थौ खिन्नमुखः किञ्चिद्गरुत्मान्विनतासुतः ॥ 5 ॥

तं तदा दीनवदनं विलोक्य गरुडं सुतम् ।
किमिदं वत्स खिन्नोऽसीत्यपृच्छत् कश्यपो मुनिः ॥ 6 ॥

गरुत्मान् –

किन्नु खेदावहं पुंसां धीराणां परसेवनात् ।
यादृशस्तादृशो वास्तु लघुर्मर्त्यः पराश्रयात् ॥ 7 ॥

इत्युक्तवन्तं पुत्रं तं वीक्ष्य ज्ञात्वा तदाशयम् ।
उवाच वचनं धीमान् कश्यपो मुनिसत्तमः ॥ 8 ॥

कश्यपः –

अयि वत्स मदीयानि वाक्यानि शृणु मा शुचः ।
इमं जप महामन्त्रं गरुत्मन् ब्रह्म भूधरे ॥ 9 ॥

In Public domain. Digitization Muthulakshmi Research Academy

ततस्सर्वार्थसिद्धिं ते विधास्यति जगत्पतिः ।
एतज्जपात्त्वन्मातापि त्वामसूत महाबलम् ॥ 10 ॥

गरुडः-

किं तत्क्षेत्रं को नु मन्त्रः ब्रूहि मे मुनिसत्तम ।
यथोच्यते त्वया तात तत्करोमि तथाखिलम् ॥ 11 ॥

कश्यपः –

शृणु वत्स पुरा वृत्तं दिव्यं कर्णामृतायितम् ।
अस्ति कृष्णीति तटिनी मनोज्ञा निर्मलोदका ॥ 12 ॥

तस्या गव्यूतिमात्रेऽस्ति महान् ब्रह्ममहीधरः ।
पुरा यत्र तपस्तेपे भगवांश्चतुराननः ॥ 13 ॥

प्राच्यां कुरुपतिक्षेत्रात्कृष्णाया उत्तरे तटि ।
पश्चिमे नरसिंहाद्रेर्वेङ्कटक्षेत्रदक्षिणे ॥ 14 ॥

सालैस्तालैस्तमालैश्च पाटलाशोकचम्पुकैः ।
नाना लताभिश्चाकीर्णो नानाद्विजनिषेवितः ॥ 15 ॥

नदेन ब्राह्मसंज्ञेन सर्वपापविनाशिना ।
उपत्यकाभूमिभागे भूषितस्तुङ्गश्रृङ्गवान् ॥ 16 ॥

तपस्यता वेधसा सा प्राक्तत्रास्नायि यतो मुहुः ।
ततस्तं ब्राह्मनामानमाहुर्नदवरं जनाः ॥ 17 ॥

सर्वक्षेत्रेतपस्सिद्धिः कोटिवर्षेण या भवेत् ।
तत्र क्षेत्रे सापि सिद्धिः करस्था वत्सरान्तरे ॥ 18 ॥

इति तत्र तपस्तेपे भगवद्दर्शनोत्सुकः ।
नियतात्मा शुचिर्दान्तो ब्रह्मा ब्रह्मविदां वरः ॥ 19 ॥

श्रुत्वा तस्यैव वदनादिदं वृत्तमहं पुरा ।
तेनोपदिष्टं तं दिव्यमष्टाक्षरमहामनुम् ॥ 20 ॥

आवर्तयन् वर्षमेकं भगवद्दत्तमानसः ।
तत्रैव नियतो भूत्वा समकार्षं तपो महत् ॥ 21 ॥

अथ प्रसन्नो भगवानाविरासीच्छ्रियःपतिः ।
वरं वृणीष्वेति स मामब्रवीत् कमलेक्षणः ॥ 22 ॥

मयापि तत्पदाम्भोजभक्तेरन्यन्न याचितम् ।
ततो मह्यमुपादिक्षत् कमलेशो दयानिधिः ॥ 23 ॥

ओं नमो रङ्गनाथायेत्येतमष्टाक्षरं मनुम् ।
सर्वसिद्धिप्रदातारं सर्वपापप्रणाशनम् ॥ 24 ॥

तदाप्रभृति तत्प्राहुः परितो योजनाष्टकम् ।
मनोज्ञं कश्यपक्षेत्रं सर्वेऽपि मुनिसत्तमाः ॥ 25 ॥

तत्रामुं रङ्गनाथस्य मन्त्रं जप महामते ।
वत्साविर्भूय भगवान् सर्वां ते दास्यति श्रियम् ॥ 26 ॥

नारदः –
इत्युक्त्वाचम्य पूताय तस्मै तं मन्त्रमुत्तमम् ।
उपादिक्षत् कश्यपोऽपि खगेशाय गरुत्मते ॥ 27 ॥

अथोपदिष्टं गुरुणा तं मन्त्रं मनसा स्मरन् ।
मुक्तां बन्धात्तदा मेने मातरं विनतां निजाम् ॥ 28 ॥

मातुरन्तिकमासाद्य वैनतेयो महाबलः ।
प्रणम्य विनतां वाक्यमिदमाह महार्थवत् ॥ 29 ॥

गरुत्मान् –
अम्ब पित्रा महान्मह्यमुपदिष्टः परो मनुः ।

In Public domain. Digitization Muthulakshmi Research Academy

यं गर्भवत्यास्ते पूर्वमुपादिक्षत् स कश्यपः ॥ 30 ॥

गत्वा तद्वचनाद्ब्रह्मभूधरं नियतात्मना ।
तपो विरच्यते मातर्मया नित्यं मनस्विना ॥ 31 ॥

अथ प्रसन्ने रङ्गेशे त्वामस्मान्मोचयाम्यहम् ।
दास्यदुःखान्महाभागे देवदेवकृपावशात् ॥ 32 ॥

नारदः –

इत्युक्तवन्तं तं तनुजं विनता वाक्यमब्रवीत् ।

विनता –

वत्स सत्यं महान्मन्त्रस्सोऽयं कश्यपबोधितः ॥ 33 ॥

नारायणाष्टाक्षरेण सम्पुटीकुरु तं मनुम् ।
ऋषिस्तु रङ्गनाथोऽस्य च्छन्दोऽनुष्टुम्महामनोः ॥ 34 ॥

परमात्मा देवतास्य प्रसादे विनियुज्यते ।
अम्बीजमायशक्तिस्स्याद्गं कीलकमुदाहृतम् ॥ 35 ॥

सर्वदा सर्वजगतां नाथो नारायणस्स्वयम् ।
श्रीरङ्गनाथो मां पायान्निखिलापन्निवारकः ॥ 36 ॥

इति ध्यात्वा महामन्त्रं जप नित्यमतन्द्रधीः ।
प्रसीदति महाबाहो भगवान् भक्तवत्सलः ॥ 37 ॥

सर्वत्र चिरकालेन प्रसीदति हरिस्स्वयम् ।
भगवान् काश्यपक्षेत्रे क्षणेनैव प्रसीदति ॥ 38 ॥

तस्माद्गत्वा तपस्तप्त्वा प्रसन्ने रङ्गनायके ।
मामस्मान्मोचय त्वं द्राग्दास्यदुःखात्सुदुस्सहात् ॥ 39 ॥

नारदः –

इत्युक्त्वा विनता सूनुं रक्षां कृत्वा यथाविधि ।

In Public domain. Digitization Muthulakshmi Research Academy

प्रेषयामास राजेन्द्र गरुडं ब्रह्मभूधरम् ॥ 40 ॥

अथ हृष्टः पक्षिराजः क्षणेनातित्वरान्वितः ।
विधूनयन् पक्षवातैरभ्रबृन्दानि लीलया ॥ 41 ॥

रङ्गनाथमनुं चित्ते साष्टाक्षरमतन्द्रधी ।
मुहुरावर्तयन् धीरः प्राप ब्रह्ममहीधरम् ॥ 42 ॥

उदग्रश्रृङ्गोल्लिखितार्कमण्डलं महार्घधातुव्रजचित्रितान्तरम् ।
स किन्नराधीशसुगीतनादितं सुरासुराधीशनिषेवितं सदा ॥ 43 ॥

तमालसालाम्ररसालवञ्जुलप्रियालुजम्बीरकपुञ्जमञ्जुलम् ।
लताशतैः पुष्पफलोपशोभितैः विद्युद्भिरम्बोदमिवावृतावनिम् ॥ 44 ॥

समग्रभक्तेक्षणभागधेयमुदारलोकेशतपःफलं तम् ।
निषेवितं प्राक्किल कश्यपेन विभूषितं ब्राह्मनदेन पार्श्वे ॥ 45 ॥

स ददर्श महार्घमणिप्रवरव्रजकान्तिभिरञ्चितदिग्वलयम् ।
चतुराननभूधरमादरतो गरुडो विनतातनयो मुदितः ॥ 46 ॥

इति श्रीमद्भविष्योत्तरपुराणे श्रीमदुत्तररङ्गमहात्म्ये गुरुडगमनं नाम चतुर्थोऽध्यायः ॥

In Public domain. Digitization Muthulakshmi Research Academy

॥ श्रीमदुत्तररङ्गेशाय नमः ॥

। श्रीरस्तु ।

॥ नारदः ॥

अथ दृष्ट्वा गिरिवरं वैनतेयः खगाधिपः ।
साष्टाङ्गं प्रणनामैनं हर्षनिर्भरमानसः ॥ 1 ॥

सस्नौ ब्राह्मनदे तत्र नियमेन समन्वितः ।
जजाप परमं जप्यं रङ्गनाथमनुस्मरन् ॥ 2 ॥

प्रदक्षिणीकृत्य गिरिं शतकृत्वः खगेश्वरः ।
आरुरोह गिरेरग्रं दिव्यधातुविचित्रितम् ॥ 3 ॥

मुनीन् समभिवन्द्याथ तत्रत्यान् विनतासुतः ।
आचम्य नियतो भूत्वा पक्षिनाथो महामतिः ॥ 4 ॥

फलभक्षः पर्णभक्षः पयोमारुतभक्षणः ।
क्रमेण स तपस्तेपे रङ्गेशे न्यस्तमानसः ॥ 5 ॥

नासाग्रन्यस्तनयन उरो विष्टभ्य चात्मवान् ।
शीतोष्णयोस्समश्शान्तो हृदि वायुं निरुद्ध्य च ॥ 6 ॥

इत्थं संवत्सरं धीमान् यथोक्तं तं महामनुम् ।
आवर्तयंस्तपस्तेपे गुरुत्मान् विनतासुतः ॥ 7 ॥

अथ संवत्सरस्यान्ते मीनमासे जगत्पतिः ।
नक्षत्रे रेवतीसंज्ञे भगवान् भक्तवत्सलः ॥ 8 ॥

साकं सर्वपरीवारैः प्रसन्नः कमलेक्षणः ।
गरुडानुग्रहार्थाय ययौ ब्रह्ममहीधरम् ॥ 9 ।

अश्रूयत ततो व्योम्नि काहलीनादमेदुरः ।
दिव्यदुन्दुभिनिर्घोषः जयशब्देन मेदुरः ॥ 10 ॥

In Public domain. Digitization Muthulakshmi Research Academy

प्रजगुर्देवगन्धर्वा ननृतुश्चाप्सरोगणाः ।
नन्दनोद्यानपुष्पाणि ववृषुस्सुरकन्यकाः ॥ 11 ॥

कुमुदादिगणाधीशा अग्रतः प्रययुर्मुदा ।
चामराण्यप्यवीज्यन्त शतशोऽथ सहस्रशः ॥ 12 ॥

श्वेतच्छत्राणि शतशः प्रकाशन्ते स्म भूपते ।
स्फुटानि पुण्डरीकाणि शरदीव सरोऽन्तरे ॥ 13 ॥

आवेदितपदन्यासः कुमुदाक्षेण भक्तितः ।
विष्वक्सेनेन सन्दत्तहस्तालम्बो जगन्निधिः ॥ 14 ॥

तं देशं प्राप गोविन्दो यत्रास्ते विनतासुतः ।
विष्वक्सेनस्ततो दृष्ट्वा निभृतं खगसत्तमम् ॥ 15 ॥

नासाग्रन्यस्तनयनमब्रवीद्गरुडं मुदा ।
विष्वक्सेनः –
वत्स पक्षीन्द्र देवेशः प्रसन्नस्ते तपोवशात् ॥ 16 ॥

दातुं ते काङ्क्षितं साक्षादागतो भगवानिह ।
तदुत्तिष्ठ जगन्नाथं प्रणम श्रीपतिं हरिम् ॥ 17 ॥

नारदः –
विष्वक्सेनेनैवमुक्तो गरुत्मान् विनतासुतः ।
ससम्भ्रममथोत्थाय प्रणनाम मुहुर्मुहुः ॥ 18 ॥

अथ तुष्टाव देवेशं भक्तिनिर्भरमानसः ।
गरुडः –
नमस्ते देवदेवेश परमात्मन् नमोस्तु ते ॥ 19 ॥

नमः पद्मनिभाक्षाय नमस्ते सर्वमूर्तये ।
त्वं हि सर्वजगत्स्रष्टा रक्षसि त्वमिदं जगत् ॥ 20 ॥

In Public domain. Digitization Muthulakshmi Research Academy

संहर्ता त्वं हि विश्वस्य कमलेश नमोस्तुते ।
त्वदायत्तमिदं सर्वं ब्रह्माद्यास्तव किङ्कराः ॥ 21 ॥

कस्याप्यवश्यमाहुस्त्वां को वेद तव चेष्टितम् ।
धन्योऽस्म्यनुगृहीतोऽस्मि कृतार्थोऽस्मि कृपानिधे ॥ 22 ॥

भगवंस्त्वत्पदाम्भोजसेवनादद्य माधव ।
इति स्तुत्वा ननर्तायमानन्दाश्रुपरिप्लुतः ॥ 23 ॥

दृष्ट्वा तं विनतासूनुमेवमानन्दनिर्भरम् ।
उवाच भगवान् वाक्यं परिरभ्य खगोत्तमम् ॥ 24 ॥

भगवान् –
वत्स श्रान्तोऽसि तपसा तुष्टोऽहं ते खगेश्वर ।
वरं वृणीष्व सर्वं ते सम्प्रदास्यामि काङ्क्षितम् ॥ 25॥

नारदः –
इत्युक्तो विनतासूनुः पुण्डरीकेक्षणेन सः ।
बद्धाञ्जलिपुटो भक्त्या सदग्ददमुवाच ह ॥ 26 ॥

गरुडः –
भगवंस्त्वत्पदाम्भोजसेवनान्नास्ति मे हरे ।
अन्यत्फलं श्रीसहायकरुणावरुणालय ॥ 27 ॥

त्वां सदार्चयितुं देव कङ्क्षामि कमलेक्षण ।
तथा कुरु दयामिच्छा यथामोघा भवेन्न मे ॥ 28 ॥

विज्ञापनमिदं चान्यद्भक्तस्य श्रृणु माधव ।
सपत्नीमन्दिरे मातुर्दास्यखेदं सुदुस्सहम् ॥ 29 ॥

न सहेऽहं तदेतत्त्वं निवारयितुमर्हसि ।

In Public domain. Digitization Muthulakshmi Research Academy

भगवान् –

गृहाण वत्साद्य विमानमेतन्नित्यं समाराधाय पक्षिराज ।
पित्रोपदिष्टो य इहास्ति मन्त्रो विद्येनमेवं तदुपास्य देवम् ॥ 30 ॥

इमां हि रङ्गनाथाख्यां प्रतिमां विद्धि मानद ।
एतदारादनात्तूर्णं त्वं सर्वां प्राप्स्यसि श्रियम् ॥ 31 ॥

एतन्मङ्गलरङ्गाख्यं विमानं पुण्यमुत्तमम् ।
अस्य सन्दर्शनान्मर्त्या मुच्यन्ते सर्वकिल्बिषैः ॥ 32 ॥

पुरात्रैव गिरौ ब्रह्म मद्दर्शनसमुत्सुकः ।
तपश्चक्रे कश्यपोऽपि भक्तिं मयि सदा वहन् ॥ 33 ॥

दृष्टं च ताभ्यामेतद्धि विमानं खगसत्तम ।
आराधितं पुरा धीर बहून् वर्षगणानिह ॥ 34 ॥

इमं मन्त्रमुपादिक्षं तव पित्रेऽहमत्र वै ।
तवोपदिष्टो यो मन्त्रस्त्वत्पित्राष्टाक्षरात्मकः ॥ 35 ॥

साक्षान्मदात्मिकामेनां विद्धि मूर्तिं खगोत्तम ।
यथा मयि तथैतस्यामपि भक्तिं सदा वह ॥ 36 ॥

अत्र संस्थापयैतद्धि विमानं ब्रह्मपूजितम् ।
यथादिरङ्गे मध्ये च पश्चिमे रङ्गमन्दिरे ॥ 37 ॥

तथात्र सन्निधिं नित्यं करोमि विनतासुत ।
इदमुत्तरङ्गाख्यं क्षेत्रं वक्ष्यन्ति भूतले ॥ 38 ॥

इत्थं वदति देवेशे पुण्डरीकेक्षणे क्षणात् ।
वल्मीकात्प्रादुरासाथ विमानं दिव्यदीप्तिमत् ॥ 39 ॥

कोटिसूर्यप्रतीकाशं किङ्किणीशतमेदुरम् ।
तद्दृष्ट्वा विनतासूनुर्वन्दे भक्तिर्विनिर्भरः ॥ 40 ॥

In Public domain. Digitization Muthulakshmi Research Academy

दिव्ये मङ्गलरङ्गाख्ये विमाने तत्र भासुरम् ।
शयानं शेषशयने क्षीरोदधविनिर्मले ॥ 41 ॥

मुक्तामयविभूषां ते हरिनीलमिवोज्वलम् ।
अन्योन्यालापशालिभ्यां मणिकङ्कणशिञ्जितैः ॥ 42 ॥

संवाहितपदाम्भोजं कराभ्यां कमलाभुवोः ।
रम्भास्तम्भोपमाभाभ्यामूरुभ्यामतिभासुरम् ॥ 43 ॥

मथितामृतफेनाभदुकुलेन विभूषितम् ।
पद्मरागकटीसूत्रविशेषेणपरिष्कृतम् ॥ 44 ॥

कृतोत्तरीयं राराजत्पीतकौशेयवाससा ।
श्रीवत्सकौस्तुभश्रीभिश्चित्रितेनोरसाञ्चितम् ॥ 45 ॥

तुलयन्तं मेघमिन्द्रधनुर्विद्युद्विचित्रितम् ।
विराजन्तं मणीहारैरुदारैरुत्तरोत्तरम् ॥ 46 ॥

कम्बुग्रीवं विशालाक्षमुन्नसं चारुकुण्डलम् ।
सुकपोलं सुभ्रुवं तं कस्तूरीतिलकाञ्चितम् ॥ 47 ॥

नानाविधमणिन्युप्तसुवर्णमकुटोज्वलम् ।
नाभीकमलराराजद्ब्रह्मणा संस्तुतं मुहुः ॥ 48 ॥

आपत्सखं महाभागं ब्रह्मणाराधितम् पुरा ।
कोटिमन्मथसौन्दर्यं कश्यपस्य तपः फलम् ॥ 49 ॥

दिव्याभ्यां शङ्खचक्राभ्यां विराजितभुजद्वयम् ।
वामं करं कटीभागे दक्षिणं मकुटीतटे ॥ 50 ॥

विन्यस्य निद्रालुमपि जागरूकं जनावने ।
ददर्श धीमान् रङ्गेन्द्रं गरुत्मान् हर्षनिर्भरः ॥ 51 ॥

In Public domain. Digitization Muthulakshmi Research Academy

अहो भाग्यमहो भाग्यमहो भाग्यमिदं महत् ।
क्वाहमल्पमतिः क्वासौ रङ्गेशः करुणानिधिः ॥ 52 ॥

इत्युच्चैर्हर्षभारेण नृत्यन्तं तं वीक्ष्य माधवः ।
अब्रवीद्विनतापुत्रमानन्दाश्रुपरिप्लुतम् ॥ 53 ॥

भगवान् –
वत्सैषा मामिका मुर्तिरिह ब्रह्मसमर्चिता ।
त्वत्पित्रा कश्यपेनापि भक्त्यात्रैव सुपूजिता ॥ 54 ॥

कदाचिदेष रङ्गेन्द्रस्त्वन्मन्त्रोपास्यदेवता ।
तल्पीभूतस्य शेषस्य प्रार्थनाविवशो मुदा ॥ 55 ॥

पाताले पूजितश्श्रीमानेतावत्कालमादरात् ।
इदानीं त्वत्तपस्तुष्टो वल्मीकादाविरास ह ॥ 56 ॥

अतो गृहाण पक्षीन्द्र विमानमिदमुत्तमम् ।
आराधय सदा भक्तिं वहन्नस्य पदाम्बुजे ॥ 57 ॥

यद्यदिच्छसि तत्सर्वं विधास्यति तवाच्युतः ।
इत्युक्त्वान्तरधाद्देव साक्षन्नारायणो हरिः ॥ 58 ॥

उदारं समीक्ष्याथ तद्व्योमयानं
भुजङ्गे शयानं तथा रङ्गनाथम् ।
मुदाराधयामास हृष्टान्तरङ्गस्सदा तं
गरुत्मान् गिरौ ब्रह्मसंज्ञे ॥ 59 ॥

इति श्रीमद्भविष्योत्तर पुराणे उत्तररङ्गमाहात्म्ये रङ्गनाथावतरणं नाम पञ्चमोध्यायः

In Public domain. Digitization Muthulakshmi Research Academy

॥ श्रीमदुत्तररङ्गेशाय नमः ॥

राजा –

नारद त्वं माहाभाग त्वत्तो भागवतोत्तमः ।
नान्योऽस्ति त्रिषु लोकेषु देवर्षे पुण्यकीर्तन ॥ 1 ॥

श्रुत्वा त्वद्वदनाम्भोजमकरन्दझरीमिह ।
रङ्गनाथकथां दिव्यां न तृप्यति मनो मम ॥ 2 ॥

अत ऊर्ध्वं किमकरो गरुत्मान् विनतासुतः ।
कथं वाराधयामास भगवन्तं जनार्दनम् ॥ 3 ॥

ईश्वरः –

श्रुत्वैतद्वचनं राज्ञो नारदो मुनिसत्तमः ।
यथावृत्तं ततो देवि वक्तुं समुपचक्रमे ॥ 4 ॥

राजर्षे शृणु पक्षीन्द्रः नित्यं नियतमानसः ।
आरराध जगन्नाथमुत्तरे रङ्गमन्दिरे ॥ 5 ॥

(…….) ब्राह्मणगिरेः पश्चिमे कटके मुदा ।
तद्विमानं (…….) ह्रदतीरे नृपोत्तम ॥ 6 ॥

कमलैरपि कह्लारैः पाटल(…….)कैः ।
मल्लीभिर्मालतीभिश्च दिव्यैश्च तुलसीदलैः ॥ 7 ॥

(…….) ते नाथ नाम्नां विहगसत्तमः ।
आराधयतस्स(…….)भिः कमलापतिम् ॥ 8 ॥

राजा –

किं तदष्टोत्तरशतं ना(मानि?) (नारद?)र्षिसत्तमः ।
रङ्गनाथस्य मे ब्रूहि धन्यस्स्यां तव (वाचा?…….) नारद ॥ 9 ॥

In Public domain. Digitization Muthulakshmi Research Academy

शतमष्टोत्तरं नाम्नां शृणु राजर्षिसत्तम (…….) ।
अष्टोत्तरशतस्यास्य ऋषिर्ब्रह्मा महामते ॥ 10 ॥

(…….)ब्देनता च श्रीमदुत्तररङ्गराट् ।
ब्रह्माद्रिनिलयो बी(…गरु?)डसेवितः ॥ 11 ॥

हृदयं परमात्मा स्याच्छान्त्य(…….)ज्यते ।
गरुडाद्रितटीदिव्यभूषणं करुणानिधिः ॥ 12 ॥

(…….)मपहर्ता मे दद्याच्छ्रियमनुत्तमाम् ।
इति ध्यायेन्त(…….)कुशपौत्र महाबलः ॥ 13 ॥

ब्रह्माद्रिनिलयश्श्रीमान् (…….)ता श्रियः पतिः ।
श्रान्तिहारी धराकान्तो धरा भृ(…….)तः ॥ 14 ॥

संसारभयदावाग्निनिर्वापणपयोधरः(…….) ।
(…….)पातकभेत्ता च सर्ववेदवचस्तुतः ॥ 15 ॥

सर्राक्षस(…….) सर्वात्मा सारसासनः ।
निर्विकारो नित्यतृप्तो निराशीर्नि(र्ममोऽ?…….)नघः ॥ 16 ॥

निर्द्वन्द्वो नित्यलक्ष्मीको निर्योगक्षेम उ(…….)।
निर्मर्यादो नित्यधीरो निर्व्रतो निरुपद्रवः ॥ 17 ॥

जरा(…….)हरो देवो जयदो जाड्यनाशनः ।
जपप्रियो जपस्तु(…….)तां नायको हरिः ॥ 18 ॥

सर्वकर्मफलं ब्रह्मपूजि(…….)पाञ्चितः ।
श्रीमदुत्तररङ्गेशो विष्णुर्गरुडसेवितः ॥ 19 ॥

(…….)तधीश्शेषशयनो नीलाम्बुदनिभाकृतिः ।
लक्ष्मीभूमीक(…….)मार्दवज्ञपदाम्बुजः ॥ 20 ॥

In Public domain. Digitization Muthulakshmi Research Academy

सर्वलक्षणसम्पन्नस्सर्व(स?....)मृद्धिदः ।
शेषाश्चितो ब्राह्मनदह्रदतीरनिकेतनः ॥ 21 ॥

गरुडाद्रिशिरोभूषा गाम्भीर्यविजिताम्बुधिः ।
मुदितान(..) मुनिमानसमन्दिरः ॥ 22 ॥

मुकुराकृतिराराजत्सुकपोलो दयानिधिः ।
नाभीनलीनजब्रह्ममुखाम्बुजवचस्स्तुतः ॥ 23 ॥

नारायणो नारदेड्यो नानारूपविहारभृत् ।
नागेन्द्रवरदो नाकपालनित्यार्चितः प्रभुः ॥ 24 ॥

प्रसन्नात्मा प्रसन्नास्यः प्राज्यकीर्तिः प्रणुन्नभीः ।
प्रेयान् प्रकृष्टहृदयः पूतात्मा परमः पुमान् ॥ 25 ॥

पूतनामा पुण्यशीलः पुरान्तकभयान्तकः ।
पुराणः पुण्डरीकाङ्क्षः पूषा पुत्रप्रदो महान् ॥ 26 ॥

मानी मान्यो मानदाता मातृवत्सर्वपालकः ।
महासत्वो महादीप्तिर्महार्घमणिभूषणः ॥ 27 ॥

मधुकैटभसंहर्ता मधुराकृतिरूर्जितः ।
मन्दराद्रिसमुद्धर्ता महीरक्षणदक्षिणः ॥ 28 ॥

माधवो मरुदाह्लादी शङ्खचक्रधरोऽमलः ।
कटीप्रसारितमहावामबाहुरमेयधीः ॥ 29 ॥

मकुटीतटविन्यस्तदिव्यदक्षिणदोर्घनः ।
परमात्मा परंब्रह्म पद्मनाभः परात्परः ॥ 30 ॥

सकलोपनिषद्वेद्यस्सद्भूतिस्सत्परायणः ।
निरञ्जनो निष्कलङ्कस्सर्वज्ञस्साधुधीप्रदः ॥ 31 ॥

एवमष्टोत्तरशतं नाम्नामेतस्य यः पठेत् ।
स सर्ववेदवेदाङ्गतत्वज्ञो भवति ध्रुवम् ॥ 32 ॥

सर्वसम्पत्समृद्धिं च स प्राप्नोति धरातले ।
अन्ते श्रीरङ्गनाथस्य चरणौ समवाप्नुयात् ॥ 33 ॥

एतैरष्टोत्तरशतनामभिर्विनतासुतः ।
नित्यमाराधयाञ्चक्रे रङ्गनाथं जगद्गुरुम् ॥ 34 ॥

अथ प्रसन्नस्तत्पूजाविशेषाद्रङ्गनायकः ।
परिचर्यापराधीनं गरुडं वाक्यमब्रवीत् ॥ 35 ॥

भगवान् प्रहृष्टोऽस्मि महाबाहो तात ते परिचर्यया ।
इह दातुं न शक्नोमि त्वत्सेवासदृशं फलम् ॥ 36 ॥

यद्यदिच्छसि कर्तुं त्वं तत्तत्सर्वं करोम्यहम् ।
अहं भक्तपराधीनो भक्तो हि मम जीवनम् ॥ 37 ॥

नारदः –
इत्युक्तो रङ्गनाथेन विनतातनुजो मुदा ।
कृताञ्जलिरुवाचेदं मातुर्दुःखं हृदि स्मरन् ॥ 38 ॥

गरुत्मान् –
माता सीदति दास्येन सपत्न्या रङ्गभूपते ।
तामुद्धर्तुमदो दुःखात्कृपां कुरु कृपानिधे ॥ 39 ॥

भगवान् –
गच्छ वत्स गृहं तूर्णं कद्रूं पृच्छ वचो हितम् ।
मातरं मे विमुञ्चेति ततस्सा मोचयिष्यति ॥ 40 ॥

नारदः –
इत्युक्तो गरुडस्तूर्णं पप्लुवेऽथ नभस्स्थलम् ।

 In Public Domain. Digitization Muthulakshmi Research Academy

निजं निकेतनं प्राप्य हृष्टधीर्विनतासुतः ॥ 41 ॥

कथयित्वा कश्यपाय रङ्गेन्द्रसदनुग्रहम् ।
मातुर्निकेतनं गत्वा तत्र तामभिवाद्य च ॥ 42 ॥

कद्रूसमीपं सम्प्राप्य नत्वा तामिदमब्रवीत् ।
गरुत्मान् –
अम्ब दास्यान्मोचयितुं मातरं मे त्वमर्हसि ॥ 43 ॥

कद्रूः –
कृतप्रतिज्ञामादेहं मद्दास्ये मातरं तव ।
कथमेतां मोचयितुं शक्नोमि विनतात्मज ॥ 44 ॥

नारदः –
इति श्रुत्वा वचो देव्याः किञ्चित्क्रोधारुणेक्षणः ।
कृताञ्जलिरुवाचेदं गरुत्मान् सर्पमातरम् ॥ 45 ॥

गरुत्मान् –
अम्बास्मदम्बां मुञ्च त्वं यद्यदिच्छसि सुव्रते ।
अशक्यमपि तद्दातुमाहृत्य प्रभवामि ते ॥ 46 ॥

इत्युक्तवति पक्षीन्द्रे हृदि कद्रूरचिन्तयत् ।
सापत्नोऽयं दुराधर्षस्तेजस्वी खगसत्तमः ॥ 47 ॥

क्रुद्धवद्राजते किञ्चिद्युक्तं नात्रोत्तरोत्तरम् ।
यदीह मौर्ख्यादस्याम्बां न मुञ्चामीति वच्म्यहं ॥ 48 ॥

किं वा करिष्यति ततः को वेदास्य पराक्रमम् ।
बालोऽयमिति नोपेक्ष्यश्शक्तोऽयं शत्रुनिग्रहे ॥ 49 ॥

वार्यते ह्यन्धतमसं बालेनापि विवस्वता ।
बालोऽपि वयसास्मत्तो ज्ञानादयमनुत्तमः ॥ 50 ॥

In Public domain. Digitization Muthulakshmi Research Academy

ज्ञानवृद्धो हि वृद्धेषु श्रेष्ठस्सद्भिः प्रगण्यते ।
किमसाध्यं भवेदस्य त्रैलोक्ये स चराचरे ॥ 51 ॥

तथाप्यसाध्यं किमपि वच्मि किं वा करोत्वसौ ।
इत्यालोच्य क्षणं चित्ते कद्रूरुत्तरमब्रवीत् ॥ 52 ॥

कद्रूः –
शूरं त्वां वत्स जानामि वैनतेय खगाधिप ।
यदि चाम्बां मोचयितुमिच्छा तेऽस्ति महामते ॥ 53 ॥

दुस्साधममरावत्यां यदास्ते देवरक्षितम् ।
तत्सुधाकलशं धीर समाहृत्य पराक्रमात् ॥ 54 ॥

मह्यं दास्यसि चेद्दास्यान्मातरं मोचयामि ते ।
नारदः –
इति श्रुत्वा वचो देव्यास्तथेत्युक्त्वा खगाधिपः ॥ 55 ॥

अमृताहरणं वीर तृणाय मनुते स्म सः ।
किमसाध्यं भवेत्तस्य यस्य रङ्गपतिर्वशे ॥ 56 ॥

अभिगम्य ततो मातुर्भवनं (...खग) सत्तमः ।
अभिवन्द्याब्रवीदेवं कृताञ्जलिरुदारधीः ॥ 57 ॥

गरुत्मान् –
अम्ब प्रसन्नो रङ्गेन्द्रश्श्रीमान् मद्वशोऽभवत् ।
त्वां दास्यान्मोचयाम्यद्य कद्र्या वाक्येन सुव्रते ॥ 58 ॥

आहृत्य चामृतं स्वर्गात्तदिष्टं परिपूरयन् ।
नमस्तेऽम्ब महाभागे स्वर्गच्छामि महामते ॥ 59 ॥

आशिषं कुरु बालानां मातुराशीस्सुखावहा ।
इत्युक्ता तनुजेनाथ विनता परिरभ्य तम् ॥ 60 ॥

In Public domain. Digitization Muthulakshmi Research Academy

रक्षां चक्रे तनूजस्य विजिगीषोर्महामतेः ।
विजयी भव वत्स त्वं सर्वास्ते सन्तु सिद्धयः ॥ 61 ॥

रक्षतु श्रीसखो नित्यं देवेशः करुणानिधिः ।
श्रीरङ्गेन्द्रस्सर्वतस्त्वां सर्वसिद्धिप्रदायकः ॥ 62 ॥

नारदः –
इति रक्षां तदा चक्रे वात्सल्यात्तनुजस्य सा ।
मातुर्वात्सल्यतो लोके नान्यन्मन्येऽधिकं नृप ॥ 63 ॥

कृतरक्षो विनतया कश्यपञ्च प्रणम्य सः ।
परिपप्रच्छ तं गन्तुं पाथेयाहारमुत्तमम् ॥ 64 ॥

कश्यपः –
पुरा हि कृतवैरौ द्वौ मुनुजौ खगसत्तम ।
जन्मान्तरेऽपि स्वं वैरममुञ्चन्तौ महाह्रदे ॥ 65 ॥

गजकच्छपरूपेण कलहं तनुतोऽनिशम् ।
तौ भक्षय ततस्तौ च त्वत्तो(न्यतो?..) न मोक्षमिहार्हतः ।
ततस्तद्भक्षणात्त्वं हि सर्वेष्वपि बलाधिकः ।
समाहरिष्यसि सुधां रङ्गनाथकृपावशात् ॥ 67 ॥

इत्युक्तस्तेन पित्राथ गरुत्मान् कृतमङ्गलः ।
तृणाय मेने देवेशमपि दिव्यपराक्रमः ॥ 68 ॥

जनकं प्रणम्य विनतातनुजः प्रमदेन पूर्णहृदयोऽतिजवात् ।
स तु जाप चे(..) रङ्गनृपतेर्निकटं चतुराननाद्रिनिलयस्य हरेः 69

इति श्रीमद्भविष्योत्तरपुरणे श्रीमदुत्तररङ्गमहात्म्ये अमृताहरणप्रस्थानं नाम षष्ठोऽध्यायः ।

In Public domain. Digitization Muthulakshmi Research Academy

॥ श्रीमदुत्तररङ्गेशाय नमः ॥

नारदः –

अथाभिवन्द्य रङ्गेन्द्रं कद्रूवाक्यं व्यजिज्ञिपत् ।
अमृताहरणान्मातुर्दास्यान्मोक्षं खगोत्तमः ॥ 1 ॥

तच्छ्रुत्वा भगवान् स्मित्वा प्राहैनं विनतासुतम् ।
भगवान् –
वत्स गच्छ करस्थस्ते विजयो विहगेश्वर ॥ 2 ॥

मयोक्तं कवचं नित्यं पठ वीर जयावहम् ।
त्वां सर्वतोऽहं रक्षामि त्व सर्वत्वं महाबल ॥ 3 ॥

सर्वतो विजयस्तेषां कुतस्तेषां पराभवः ।
योषामहं प्रसीदामि कृपया विनतासुत ॥ 4 ॥

नारदः –

इत्युक्तो रङ्गनाथेन तस्य कृत्वा प्रदक्षिणम् ।
नाम्नामष्टोत्तरेणाथ शतेन परिपूज्य तम् ॥ 5 ॥

मुहुः प्रणम्य साष्टाङ्गं विजये कृतमानसः ।
पक्षावुच्चलयन् वेगात् पुप्लुवे गगनं खगः ॥ 6 ॥

कश्यपेन यथाज्ञप्तं तथा कुर्वन् खगोत्तमः ।
अप्रणामशरीरौ तौ गृहीत्वा गजकच्छपौ ॥ 7 ॥

स्थलं विचिन्वन् निक्षेप्तुं तौ तदा स महाबलः ।
निलये वालखिल्यानां शतयोजनविस्तृते ॥ 8 ॥

वटे सुभेद्रे चिक्षेप भक्षणे कृतमानसः
भग्ना तद्भारतश्शाखा वटस्य महतोऽपि च ।
ततो दृष्ट्वा सतां शाखां भग्नां विहगपुङ्गवः ॥ 9 ॥

In Public domain. Digitization Muthulakshmi Research Academy

तदाश्रितान् वालखिल्यान् दृष्ट्वा भीतमनाः क्षणम् ।
त्रोट्या जग्राह तां शाखां महतीं विनतात्मजः ॥ 10 ॥

चरणाभ्यामुभाभ्यां च गृहीत्वा गजकच्छपौ ।
जगाम कश्यपस्याथ समीपं भीतमानसः ॥ 11 ॥

अथ तद्वीक्षणाद्भीतः कश्यपोऽपि कृताञ्जलिः ।
क्षन्तव्यं बालकृतमित्यप्रार्थयत तान् मुनीन् ॥ 12 ॥

ते ततः प्रार्थनात्तस्य वालखिल्या महीपते ।
अवतीर्णा यथास्थानं जग्मुर्मुदितमानसाः ॥ 13 ॥

तां विसृज्य ततश्शाखां मेरोः पार्श्वे खगोत्तमः ।
भक्षयित्वा महाकायौ तदा तौ गजकच्छपौ ॥ 14 ॥

अतृप्तचेताः पुनरप्यागत्य पितुरन्तिकम् ।
तदाहारं नालमिति प्राह तं कश्यपं मुनिम् ॥ 15 ॥

अतृप्तं तं सुतं दृष्ट्वा कश्यपो मुनिसत्तमः ।
क्षणमालोच्य तेजस्वी वाक्यमेतदुवाच ह ॥ 16 ॥

कश्यपः –
वत्साम्बुधेस्तटे काचित्फल्लीभिल्लैस्समावृता ।
तद्भक्षणाजगत्क्षेमं कुरु ते तृप्तिमप्यलम् ॥ 17 ॥

तत्रैको ब्राह्मणोऽह्यस्ति तं मुञ्च त्वं वितन्द्रधीः ।
इत्युक्तोऽयं तथैत्युक्त्वा गत्वा विहगपुङ्गवः ॥ 18 ॥

भिल्लैर्दुष्टैः परिवृतां फल्लीं सपदि भक्षयन् ।
गले दहन्तं विप्रेन्द्रं निरजीगलदाशु सः ॥ 19 ॥

अथ तृप्तः प्रसन्नात्मा विनतान्दवर्धनः ।
पक्षावद्धूनयन्नुच्चैरुत्पपात नभस्स्थलम् ॥ 20 ॥

In Public domain. Digitization Muthulakshmi Research Academy

देवदेवं हृदि ध्यायन् हर्षनिर्भरमानसः ।
रङ्गनाथस्य कवचमुच्चैस्तदनुसन्दधे ॥ 21 ॥

अग्रतः पातु रङ्गेन्द्रः पृष्टतः कश्यपाञ्चितः ।
लक्ष्मीसखो दक्षिणत उत्तरे ब्रह्मपूजितः ॥ 22 ॥

आग्नेय्यां ब्रह्मभूमीध्रशिखरालिविभूषणम् ।
नैऋत्यां शेषशयनो वायव्यां वरदो हरिः ॥ 23 ॥

ईशान्यमीश्वरस्साक्षादूर्ध्वं गरुडपूजितः ।
सर्वतः पातु रङ्गेन्द्र उत्तरं रङ्गमाश्रितः ॥ 24 ॥

इति ध्यात्वा स कवचं सर्वतो निर्भयो मुहुः ।
आप्लुत्याप्लुत्य सहसा जगाम रिपुसूदनः ॥ 25 ॥

पक्षोर्धूननसञ्जातमरुत्कम्पितदिक्तटः ।
पक्ष्याभ्यां कन्दुकीकुर्वन् बिम्बौ तौ चन्द्रसूर्ययोः ॥ 26 ॥

घनाघनान् समाकर्षंस्तारा व्याकुलयन्मुहुः ।
भर्त्सयन्निव देवेशं दारयन्निव पुष्करम् ॥ 27 ॥

वेगादखण्डं ब्रह्माण्डं कम्पयन् धीरधीर यम् ।
आक्रामन्निव दुर्धर्षो भुवनानि चतुर्दश ॥ 28 ॥

आचामन्निव सप्तापि समुद्रान् दृढविक्रमः ।
उद्वेजयन् दिङ्मातङ्गान् भक्षयन्निव देवताः ॥ 29 ॥

जगर्ज प्रलयस्यान्ते पर्जन्य इव मूर्तिमान् ।
तेन नादेन गीर्वाणाः किमेतदिति विस्मिताः ॥ 30 ॥

क्षणेनाथमहातेजाः प्रविवेशामरावतीम् ।
पश्यंस्तां नगरीं दिव्यां दिव्यगन्धर्वसेविताम् ॥ 31 ॥

In Public domain. Digitization Muthulakshmi Research Academy

मनोज्ञैर्नन्दनोद्यानैर्दिव्यैस्सकवचामिव ।
अप्सरोभिस्समाकीर्णां नित्यमुत्सवशालिनीम् ॥ 32 ॥

सम्प्राप्येन्द्रस्य भवनमिदं वचनमब्रवीत् ।
गरुत्मान् –
भ्रातस्सपत्नीदास्येन खिन्नामम्बां ममाधुना ॥ 33 ॥

सम्मोचयितुकामोऽहं कद्रूवाक्यादिहागतः ।
कलशं ह्यमृतस्याद्य वात्सल्याद्दातुमर्हसि ॥ 34 ॥

ततोऽस्मदम्बा मुच्यते दास्यादस्मात्सुराधिप ।
इत्युक्तवन्तं गरुडं वीक्ष्येन्द्रोऽपि जहास ह ॥ 35 ॥

तं वीक्ष्य क्रोधताम्राक्षश्शुने मत्वामराधिपम् ।
अमृतस्य ततस्स्थानं समवाप खगोत्तमः ॥ 36 ॥

पयोमयं च परिखमेकमग्निमयं तथा ।
सर्पशस्त्रसमाकीर्णं प्राकारमपरं खगः ॥ 37 ॥

परितोऽप्यमृतस्थानं रक्षणं स ददर्श ह ।
तद्रक्षिणो महाशूरान् शूलपट्टसधारिणः ॥ 38 ॥

विदार्य विहगेन्द्रोऽसौ त्रोटीकोट्या महाबलः ।
सर्वं तत्समतिक्रम्य प्रविवेश सुधास्थलम् ॥ 39 ॥

श्रीमदुत्तररङ्गेन्द्रकवचेनाभिरक्षितम् ।
न बबाधे किमप्येनं विहगेन्द्रं महाबलम् ॥ 40 ॥

अथ जग्राह कलशममृतस्य महामतिः ।
निजोपास्यं तदा देवं ध्यायन् हृदि मुहुर्मुहुः ॥ 41 ॥

एतस्मिन्नन्तरे दूतैरिदं वृत्तं गरुत्मतः ।
श्रुत्वा क्रुद्धस्सहस्राक्षस्समुत्थायाथ तत्क्षणात् ॥ 42 ॥

In Public domain. Digitization Muthulakshmi Research Academy

सर्वामाज्ञापयन् सेनां युद्धाय कृतनिश्चयः ।
दिक्पालैस्सहितस्सर्वैरारुरोहैरावतं द्विपम् ॥ 43 ॥

क्रोधारुणितनेत्रौघो वज्रं सपदि कम्पयन् ।
अत्युद्धतैर्नभो भिन्दन् दिव्यदुन्दुभिनिस्वनैः ॥ 44 ॥

बधानैनमिति क्रोधाद्भृत्यवर्गान् वदन्मुहुः ।
आजगाम महातेजास्समीपं स गरुत्मतः ॥ 45 ॥

बद्धुमिन्द्राज्ञयात्मानमागतानमरांस्तदा ।
त्रोट्या विदारयामास गरुत्मानविचारयन् ॥ 46 ॥

यो यस्समायाति तदा नखैस्तं तं व्यदारयत् ।
अथ साक्षात्सहस्राक्षः प्राप्य तन्निकटं रुषा ॥ 47 ॥

खगाय तस्मै चिक्षेप वज्रं स्वं तादृशं महत् ।
पुष्पवन्मृदुतां प्राप तस्मिन् विहगसत्तमे ॥ 48 ॥

वृत्तघात्यपि तद्वज्रं तद्दिव्यकवचां चित्ते ।
बलवृत्राहिहन्तापि भगवानमराधिपः
रङ्गनाथकृपापूर्ण नाशक्नोज्जेतुमेष तु ॥ 49 ॥

जय्या अपि दुराधर्षा भवन्ति महदाश्रयात् ।
समुद्रेण परित्रातो यथा मैनाकपर्वतः ॥ 50 ॥

अथ क्रुद्धो विहङ्गेन्द्र उच्चैर्गर्जन्महाबलः ।
नखैर्व्यदारयत्कांश्चित्तलैः कांश्चिदचूर्णयत् ॥ 51 ॥

ददंश दशनैः कांश्चित्पक्षात्कांश्चिदपोथयत् ।
छिन्नान् भिन्नान्निपतितांस्तदा चक्रेऽमरान् खगः ॥ 52 ॥

तत्र सर्वेऽपि देवास्ते गरुडाङ्गे मुहुर्मुहुः ।
सर्वतश्श्रीरङ्गनाथं रक्षन्तं ददृशुर्हरिम् ॥ 53 ॥

In Public domain. Digitization Muthulakshmi Research Academy

दुर्जयं तं ततो ज्ञात्वा कवचेनाभिरक्षितम् ।
पलायनं तदा युद्धात्ते सर्वे बहु मेनिरे ॥ 54 ॥

पलायमानांस्तान् दृष्ट्वा जगर्ज सहसा खगः ।
तद्गर्जितश्रवणतः केचित्तत्रैव मोहिताः ॥ 55 ॥

तेनावस्क्रियमाणास्ते गरुडेन दिवौकसः ।
छिन्ननासोष्ठकर्णास्यबाहुजानुकटीतटाः ॥ 56 ॥

हतास्स इति निर्लज्जाः क्रन्दन्ति स्म पलायिताः ॥ 57 ॥

अमर्त्यता बाधिकाऽभूत्तेषां युद्धे गरुत्मता ।
दीर्णानां निधनं यातुं कुशपौत्र महामते ॥ 58 ॥

तेजसा गरुडस्याथ मुहुरन्धीकृतास्सुराः ।
अनिमेषा अपि तदा न किञ्चिद्दृशुर्जगत् ॥ 59 ॥

आगतानागतान् वीरो दारयामास वेगवान् ।
ततस्सर्वे पराभूतास्तत्क्षणेन गरुत्मता ॥ 60 ॥

अग्निर्भीत्या ततश्शैत्यं जगाम स्वेदवारिभिः ।
क्रोशता युद्धरङ्गाद्वाञ्महिषेण निजेन सः ॥ 61 ॥

तदा पलायनं चक्रे यमोऽपि नियमं विना ।
अभून्मुख्यं गुणं त्यक्त्वा कोणपः गुणप्राकृतिः ॥ 62 ॥

वरुणश्शरणं कञ्चिन्नोपलेभे पलायितः ।
वायुश्च बहु मेनेऽथ निजवेगं पलायने ॥ 63 ॥

नरवाहनसादृश्यमवाप नरवाहनः ।
ईश्वरोऽनीश्वरश्चासी गरुडेन पराजितः ॥ 64 ॥

शतमन्युश्शतं मन्यून् प्राप भूमीशदुस्तरान् ।
तत्रासीन्मम नेत्रस्य पारणा स्वेष्टपूरणा ॥ 65 ॥

In Public domain. Digitization Muthulakshmi Research Academy

ततः पलायमानं तं वीक्ष्य शक्रं खगाधिपः ।
उच्चैर्नदन्निदं वाक्यं जगाद धरणीपते ॥ 66 ।

गरुत्मान् –
भ्रातस्तात सुधां पूर्वं याचितस्त्वं मया हरे ।
मुदा परिहसन्नस्मानद्य कस्मात्पलायसे ॥ 67 ॥

नेदं युक्तं हि शूरस्य युद्धरङ्गात्पलायनम् ।
क्षणं तिष्ठ महावीर पश्यानुजपराक्रमम् ॥ 68 ॥

विद्धि मां रङ्गनाथस्य भक्तं दुर्धर्षणं परैः ।
निवर्तस्व कुतो भीतिस्तवापि बलवृत्रहन् ॥ 69 ॥

नारदः –
इत्थमाकार्यमाणोऽपि विनतानन्दनेन सः ।
भीतस्तस्माद्वितेनेऽसावनिवर्त्य पलायनम् ॥ 70 ॥

एवं निर्धूय तान् सर्वानुन्नद्योच्चैः प्रतापवान् ।
जग्राह दिव्यं कलशममृतस्य महाबलः ॥ 71 ॥

इति सपदि स जित्वा सर्वदिक्पालसङ्घान् प्रमुदितहृदयोऽसौ रङ्गनाथप्रसादात् ।
अमृतकलशमाराद्दिव्यमादाय हस्ते स्तुत इह मुनिसङ्घैः कश्यपक्षेत्रमाप ॥72॥

अथ स किल गरुत्मान् सर्वमेतन्महात्मा
सरसिजनयनाय स्वं निगद्येतिवृत्तम् ।
नलिनभवधराग्रे रङ्गनाथाय भक्त्या
ह्यमृतकलशमेतत्सन्निवेद्यास मोदम् ॥ 73 ॥

इति श्रीभविष्योत्तरपुराणे श्रीमदुत्तररङ्गमाहात्म्ये अमृतकलशाहरणं नाम सप्तमोध्यायः ।

In Public domain. Digitization Muthulakshmi Research Academy

॥ श्रीमदुत्तररङ्गेशाय नमः ॥

नारदः ॥

अथ दीनस्सुराधीशः पराभूतो गरुत्मता ।
इतिकर्तव्यतामूढस्सुधर्मां प्राविसत् सभाम् ॥ 1 ॥

तत्र दृष्ट्वा महाभागं गुरुं नैजं बृहस्पतिम् ।
खिन्नो दीनमना भूत्वा वाक्यमेतदुवाच ह ॥ 2 ॥

इन्द्रः –

गुरो कथं नु कर्तव्यं सुधाकलशमुत्तमम् ।
जहारास्मांस्तृणीकृत्य गरुडो विनतासुतः ॥ 3 ॥

किन्नु कार्यमथेदानीं दुर्जयोऽसौ खगोत्तमः ।
कथं वा पुनरस्माकममृतप्राप्तिरिष्यते ॥ 4 ॥

बृहस्पतिः –

अत्रोपायो नान्य इन्द्र कर्तुं शक्यस्सुराधिप ।
रङ्गनाथप्रभावेण सर्वमेतत्कृतं ध्रुवम् ॥ 5 ॥

तमेवोत्तररङ्गेन्द्रं प्रार्थयामो वयं हरे ।
तद्भक्तोऽयं दुराधर्षो गरुत्मान् विहगोत्तमः ॥ 6 ॥

नातिवर्तेत तस्याज्ञां कदापि दृढधीरयम् ।
भगवानेव तद्धस्ताद्दापयिष्यति ते सुधाम् ॥ 7 ॥

त्वरस्व त्वं महाभाहो गच्छामो रङ्गमन्दिरम् ।
कथयन्ति भुवि प्राज्ञा आलस्यादमृतं विषम् ॥ 8 ॥

आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः ।
क्षिप्रमक्रियमाणस्य कालः पिबति सम्पदः ॥ 9 ॥

नारदः –

In Public domain. Digitization Muthulakshmi Research Academy

इत्युक्तो गुरुणा शक्रस्सह सर्वैर्मरुद्गणैः ।
समवापोत्तरं रङ्गं पुरस्कृत्य बृहस्पतिम् ॥ 10 ॥

काश्यपक्षेत्रभूकान्तालङ्कारतिलकायितम् ।
ददृशुर्गरुडाद्रिं तं सर्वे ते देवतागणाः ॥ 11 ॥

तत्र मङ्गलरङ्गेऽथ विमाने दिव्यकान्तिनि ।
ददृशुर्भोगिशयनं रङ्गेन्द्रं गरुडप्रियम् ॥ 12 ॥

अग्रतस्तस्य पक्षीन्द्रं बद्धाञ्जलिपुटं सुराः ।
सुधाकलशमप्येते ददृशुस्तन्निवेदितम् ॥ 13 ॥

प्रणम्य सर्व एवैतेतत्सौन्दर्यविलोकनात् ।
चक्षुषामनिमेषाणां साफल्यं प्रापुरुत्तमम् ॥ 14 ॥

ततश्शक्रः प्रशान्तात्मा बद्धाञ्जलिपुटो हरिम् ।
इदमभ्यर्थयाञ्चक्रे भक्तिनिर्भरमानसः ॥ 15 ॥

इन्द्रः –
नमस्ते गरुडाद्रीश नमस्ते गरुडप्रिय ।
नमस्ते पुण्डरीकाक्ष नमस्ते कश्यपाञ्चित ॥ 16 ॥

देवदेव जगन्नाथ त्वद्भक्तेन गरुत्मता ।
यदस्मज्जीवनं सर्वं त्वद्दत्तं तदुपाहृतम् ॥ 17 ॥

सहनेनैवामृतेन गतास्माकममर्त्यता ।
कृपया तदिहास्माकं त्वं दापयितुमर्हसि ॥ 18 ॥

भक्तेष्वस्मासु रङ्गेन्द्र नोपेक्षां कर्तुमर्हसि ।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम् ॥ 19 ॥

नारदः –
इति श्रुत्वा वचस्तस्य रङ्गनाथः कृपानिधिः ।

In Public domain. Digitization Muthulakshmi Research Academy

समीपस्थं गरुत्मन्तमिदं वचनमब्रवीत् ॥ 20 ॥

भगवान् –

श्रृणु वत्स मदीयानि वाक्यानि विनतात्मज ।
दीनोऽसावमराधीशो विद्येनं भ्रातरं तव ॥ 21 ॥

न विषीदेद्यथा चायममृताहरणादिह ।
यथा प्रसीदेत्कद्रूश्च तथाऽस्मिन् करुणां कुरु ॥ 22 ॥

अपि चैतत्प्रवक्ष्यामि हितं विहगसत्तम ।
भ्रातरं खेदयित्वैनमाहृत्य कलशं वरम् ॥ 23 ॥

अपि मातृसपत्न्यास्ते सम्प्रदास्यसि चेत्खग ।
सापि स्वतनुजेभ्यस्तं दास्यति ध्रुवमादरात् ॥ 24 ॥

आशीविषाश्च पीत्वा तदवधार्हा भवन्ति ते ।
ततस्सर्वा जगत्सर्वं नाशयिष्यन्ति ते ध्रुवम् ॥ 25 ॥

नीचदुश्चेष्टितं तेषामिदानीमेव दुस्सहम् ।
अमृतप्राशनादूर्ध्वं किं वक्तव्यं महामते ॥ 26 ॥

त्रैलोक्याधिपतेः खेदाद्भ्रातुरस्य महात्मनः ।
दुरात्मनां च ज्ञातीनां हर्षणात्किन्नु ते फलम् ॥ 27 ॥

ज्ञातयो ये दुरात्मानस्तेषु नार्हा दया क्वचित् ।
व्याधीनां वर्तमानानां दयते को नु बुद्धिमान् ॥ 28 ॥

न दया तेषु कर्तव्या प्रणता इति सत्तम ।
बुद्धिमान् ज्ञातिवर्गांस्तान् हन्यादेव दुरात्मनः ॥ 29 ॥

ज्ञातिर्बालोऽपि नोपेक्ष्यस्सर्वं व्याप्नोत्यतः परम् ।
स्वल्पोऽप्यग्निर्वनं सर्वं गरुत्मन् दहति क्षणात् ॥ 30 ॥

In Public domain. Digitization Muthulakshmi Research Academy

रूढमूलो भवेद्ज्ञातिर्बाल्ये स्यादद्युपेक्षितः ।
विषवृक्षो यथा सस्यदशायां समुपेक्षितः ॥ 31 ॥

कृपालवो महात्मानो यदिच ज्ञातयो भुवि ।
जीवन्तऽन्योन्यमाश्रित्य ते द्रुमा वनजा इव ॥ 32 ॥

दुरात्मानस्तु पक्षीन्द्र महात्मानमपि क्षणात् ।
उद्युञ्जते पातयितुं दायादं विषपुष्पवत् ॥ 33 ॥

महात्मना दुरात्मानो रक्षिता अपि सत्तम ।
तमेव समये घ्नन्ति दुष्टास्सर्पा इव क्षणात् ॥ 34 ॥

अतस्तेषु दया नार्हा विनतानन्दवर्धनः ।
दुरात्मानो हि भुजगा महात्मायं मरुत्पतिः ॥ 35 ॥

यथा मुञ्चेन्मातरं ते कद्रूर्दास्यात्खगोत्तम ।
यथायं देवराजश्च भ्राता ते हर्षमाप्नुयात् ॥ 36 ॥

तथोपायं प्रवक्ष्यामि शृणु त्वं विनतासुत ।
सुधाकलशमेतत्त्वं कृत्वा कद्रूवशे खग ॥ 37 ॥

इदमस्पृश्यमशुचीभूतैरिति निगद्य च ।
मातरं ते मोचयित्वा गच्छान्यत्र ततः परम् ॥ 38 ॥

एतस्मिन्नन्तरे वी रमन्मायामोहिताश्च ते ।
सर्वास्सुधायास्सम्प्राप्या पारवश्यं प्रयान्त्यहो ॥ 39 ॥

तस्मिन्नेव ततः काले सुरेशस्यास्य धीमतः ।
सुधाकलशमाहर्तुं समयः पक्षिसत्तम ॥ 40 ॥

खेदो न युज्यते ह्यस्य भ्रातुस्तव ममापि च ।
प्रतीकारः कपटीनां कपटेनैव युज्यते ॥ 41 ॥

In Public domain. Digitization Muthulakshmi Research Academy

कैतवाद्यत्त्वदम्बायै दास्यं कद्रूर्ददौ पुरा ।
तस्या अपि मनस्तद्वत्कैतवेनैव पूर्यते ॥ 42 ॥

नारदः –
इत्युक्तो रङ्गनाथेन भक्तिमान् विनतासुतः ।
तथेत्युक्त्वा तदादाय सुधाकलशमुत्तमम् ॥ 43 ॥

कद्रूसमीपं सम्प्राप्य वाक्यमेतदुवाच ह ।
गरुत्मान् –
अम्बानीतो महाभागे सुधाकलश उत्तमः ॥ 44 ॥

विमुच्यतामस्मदम्बा दास्यादस्मात्सुदुस्सहात् ।
नारदः –
विस्मिता कर्मणा तस्य कद्रूरुत्तरमब्रवीत् ॥ 45 ॥

कद्रूः –
वत्सेदानीं विमुक्तासीद्दास्यान्माता तवानघ ।
कथं नु न स्यात्सत्पुत्रान्मातुर्बन्धविमोचनम् ॥ 46 ॥

देयं सुधायाः कलशं मह्यं विहगपुङ्गव ।
इत्युक्तोऽथ तया मुक्तां मातरं च विलोक्य सः ॥ 47 ॥

प्राचीनाग्रेषु दर्भेषु स्थापयामास तां सुधाम् ।
अस्पृश्यमेतदशुचीभूतैरम्ब दृढव्रते ॥ 48 ॥

सर्वदावहितैः पाल्यमित्युक्त्वा विनतासुतः ।
विमोच्य मातरं दास्याद्रङ्गनाथकृपावशात् ॥ 49 ॥

हृष्टान्तरं गोमात्राथ तातस्य निकटं ययौ ।
प्रणम्य कश्यपं तत्र सर्वं वृत्तं व्यजिज्ञिपत् ॥ 50 ॥

In Public domain. Digitization Muthulakshmi Research Academy

सोऽपि दास्याद्विमुक्तां तां धर्मपत्नीं यशस्विनीम् ।
तनुजं च महावीरं वीक्ष्य हर्षं परं ययौ ॥ 51 ॥

अहे सापत्न्यविद्वेषो दुर्वारो भुवनत्रये ।
गर्भवत्यै सपत्न्यै प्राग्गरं प्रादात्त्वदन्वये ॥ 52 ॥

काचित्साकं गरेणैव ज्ञातं तं सगरं विदुः ।
यस्य पुत्रसहस्राणि षष्टिरासीद्धरापते ॥ 53 ॥

एतस्मिन्नन्तरे तत्र मायया मोहिता हरेः ।
आजगरूकास्सर्पास्ते तस्थुस्सर्वे महीपते ॥ 54 ॥

तद्विलोक्य ततश्छिद्रमपहृत्य सुराधिपः ।
सुधायाः कलशं वेगाद्दिवं प्राप सहामरैः ॥ 55 ॥

ततस्सर्पाश्च कलशं सुधाया नैव वीक्ष्यते ।
पप्रच्छुः कुत्र कलश इति तं विनतासुतम् ॥ 56 ॥

गरुत्मान् –
प्रागेवोक्तं मया साधु रक्षतेति भुजङ्गमाः ।
को जानीते युष्मदीयमान्द्यमेवाद्यपृच्छत ॥ 57 ॥

नारदः –
इत्युक्तवति पक्षीन्द्रे खिन्नास्ते फणिनो जवात् ।
दर्भेषु पतितां किञ्चिल्लिलिहुर्भूपते सुधाम् ॥ 58 ॥

दर्भसङ्घर्षणाज्जिह्वा द्विधा तेषां व्यशीर्यत ।
अस्वाद्य वस्त्वभावेऽपि रसने द्वे बभूवतुः ॥ 59 ॥

भुक्त्यभावेऽपि निस्वानां वर्धन्ते बहवः प्रजाः ।
तदा प्रभृति सर्पाणां प्रख्याताभूद्विजिह्वता ॥ 60 ॥

In Public Domain. Digitization Muthulakshmi Research Academy

तादृशामृतसंसर्गाद्दर्भाणां च पवित्रता ।
तदा प्रभृति नागेषु विद्वेषोऽपि गरुत्मतः ॥ 61 ॥

त्वरया तेषु गच्छत्सु देवेषु कलशाग्रतः ।
किञ्चिद्ब्राह्मनदस्याग्रे चलिता न्यपतत्सुधा ॥ 62 ॥

अतस्सुधामुखं प्राहुरिमं नदवरं नृप ।
ब्राह्मस्सुधामुखश्चेति नदस्यास्याभिधे उभे । 63 ॥

गरुडोऽपि प्रहृष्टात्मा पितृभ्यां साकमादरात् ।
आरराध ब्रह्मगिरौ रङ्गनाथं जगत्पतिम् ॥ 64 ॥

सुधां समादाय यथापुरं पुनर्निक्षिप्य हृष्टा विबुधा नभस्थलात् ।
पुष्पाणि भक्त्या ववृषुस्तदाप्सरो प्रजाः प्रहृष्टा ननृतुर्मुहुर्मुहुः ॥ 65 ॥

अवादयन् दुन्दुभितालमर्दलं
मुहुर्मुहुस्तूर्यशतान्यनादयन् ।
प्रतुष्टुवुर्दैवतयक्षकिन्नराश्श्रयः
पतिं तं गरुडाद्रिभूषणम् ॥ 66 ॥

अहो हरेर्भक्तजनेष्नुग्रहो
महानसौ यद्विहगाधिपोऽखिलान् ।
विजित्य नः पुण्ययशा जहार तं
सुधाघटं यत्कवचेन रक्षितः ॥ 67 ॥

इति मुदितमनस्सु तेषु देवेष्वनुदिनमप्यभिवन्द्य रङ्गनाथम् ।
विहगपतिरसौ सहैव मात्रा सह जनकेन च तं रराध देवम् ॥ 68

इति श्रीभविष्योत्तरपुराणे श्रीमदुत्तररङ्गमाहात्म्ये विनतादास्यमोक्षणं नामाष्टमोऽध्यायः ।

In Public domain. Digitization Muthulakshmi Research Academy

॥ श्रीमदुत्तररङ्गेशाय नमः ॥

राजा –

धन्योऽहं त्वन्मुखाम्भोजाच्छ्रुत्वा दिव्यकथामिमां ।
तथापि पृच्छ्यते किञ्चिद्देवर्षे वक्तुमर्हसि ॥ 1 ॥

क्षेत्राणि यानि प्रोक्तानि परितो गरुडाचलम् ।
तेषामपि कथां किञ्चिद्ब्रूहि भागवतोत्तम ॥ 2 ॥

नारदः –

साधु पृष्टं महाभाग महाभागवतोत्तम ।
विनानुयोगं नो युक्तमुत्तरं गदितुं नृप ॥ 3 ॥

शृणु भूपाल यत्प्रोक्तं क्षेत्रं कुरुपतेरिति ।
तस्य वृत्तं प्रवक्ष्यामि महावीर महामते ॥ 4 ॥

पुरारण्ये वसन् राजा भरतः कुरुसत्तमः ।
काश्यपक्षेत्रमाहात्म्यं श्रुत्वा धौम्यमुखान्नृप ॥ 5 ॥

सर्वक्षेत्रादपि क्षेत्रमेतद्वेगेन सिद्धिदम् ।
विदित्वाऽत्र तपस्तेपे शत्रून् जेतुं समुत्सुकः ॥ 6 ॥

योजनद्वयमात्रेऽस्माद्धरतो धर्मवत्सलः ।
ध्यायन्नमुं रङ्गपतिमुवासाहानि कानिचित् ॥ 7 ॥

अथ तस्य तपश्चर्यासन्तुष्टहृदयो हरिः ।
तत्राविरासीद्भूमीभृत्कटके कमलेक्षणः ॥ 8 ॥

शङ्खचक्रधरश्श्रीमान् पीतवासा जनार्दनः ।
श्रीनिवासो जगन्नाथस्तस्मै सर्वान् वरानदात् ॥ 9 ॥

तदा कुरुपतिक्षेत्रमिति तस्य प्रथाभवत् ।
वदन्ति च महावीर गिरि कुरुपतेर्गिरिम् ॥ 10 ॥

In Public domain. Digitization Muthulakshmi Research Academy

एवमुत्तरतो योगी भरद्वाजस्तपश्चरन् ।
ध्यायन्नमुं रङ्गनाथं संवत्सरमुपास्त सः ॥ 11 ॥

तत्रापि तत्तपस्तुष्टश्श्रीनिवासाकृतिर्हरिः ।
तन्मनस्तोषयामास स्वयं रङ्गपतिस्तदा ॥ 12 ॥

एवं प्राच्यां महाभाग तपस्यन्तं महामतिम् ।
प्रह्लादं तोषयन् श्रीमान् दिव्यसिंहाकृतिर्हरिः ॥ 13 ॥

सक्षादुत्तररङ्गेशस्सिंहाद्रौ प्रादुरास ह ।
पश्येशान्यां दिशि गिरिमवेदूरे तदन्तिके ॥ 14 ॥

राजन् कदाचिदक्रूरो यात्रायां सक्तमानसः।
द्वापरान्ते महाबाहो सर्वक्षेत्रं समेष्यति ॥ 15 ॥

इदं रङ्गस्थलं प्राप्य स्नात्वा दिव्ये सुधामुखे ।
त्वरया सिद्धिदं क्षेत्रं विदित्वा मुनिवाक्यतः
नत्वामुं गरुडाद्रीशं प्रार्थयिष्यति भक्तितः ॥ 16 ॥

इदानीं बालकृष्णं तं वेणुनादविनोदिनम् ।
द्रष्टुमभ्युत्सुको देव रङ्गनाथ भवाम्यहम् ॥ 17 ॥

कृपया मयि तद्रूपं दर्शय त्वं जगत्पते ।
त्वां मन्ये गरुडाद्रीश तमेव यदुनन्दनम् ॥ 18 ॥

इत्युक्तो रङ्गनाथोऽसौ क्षेत्रादस्मान्महामते ।
ईशान्यां दिशि राजेन्द्र कोशार्धे कृपया हरिः ॥ 19 ॥

श्रीरङ्गनाथोऽक्रूराय तद्रूपं दर्शयिष्यति ।
बर्हिबर्हावतं सन्तं गुञ्जापुञ्जविभूषितम् ॥ 20 ॥

यदुवंशमहाभाग्यं वेणुनादविनोदिनम् ।
बालकृष्णं विलोक्यात्र सोऽक्रूरो मुदमेष्यति ॥ 21 ॥

In Public domain. Digitization Muthulakshmi Research Academy

तदाक्रूरक्षेत्रमिति कथयिष्यन्ति तद्विजाः ।
एवमेतन्महावीरपरितः क्षेत्रवैभवम् ॥ 22 ॥

ततस्सा दास्यनिर्मुक्ता विनतात्यन्तहृष्टधीः ।
मुहुराराधयामास पत्या साकं श्रियः पतिम् ॥ 23 ॥

गरुडोऽपि महाभागस्सुधामुखनदेऽनिशम् ।
स्नात्वा देवं रङ्गनाथमानर्चाथ बहून् युगान् ॥ 24 ॥

एवमिन्द्रादयो देवा मीनमासे जगत्पतिम् ।
रेवत्यामत्र राजेन्द्र प्रतिवर्षं मुदान्विताः ॥ 25 ॥

पारिजाताप्रसूनाद्यैर्गरुडाद्रिविभूषणम् ।
अर्चयन्ति महाभाहुं रङ्गनाथं जगद्गुरुम् ॥ 26 ॥

कथितमिदमुदारदिव्यवृत्तं
गरुडधराभृददीशरङ्गधाम्नः ।
अपि निशमितमत्र साधु राजन्
भगवति पूर्णतरां वहस्व भक्तिम् ॥ 27 ॥

इति श्रीभविष्योत्तरपुराणे श्रीमदुत्तररङ्गमाहत्म्ये सर्वक्षेत्रवर्णनं नाम नवमोऽध्यायः ।

In Public domain. Digitization Muthulakshmi Research Academy

॥ श्रीमदुत्तररङ्गेशाय नमः ॥

ईश्वरः –

श्रुत्वा सर्वेऽपि मुनयो नारदेनाथ कीर्तिताम् ।
कथां श्रीरङ्गनाथस्य हर्षनिर्भरमानसाः ॥ 1 ॥

कुशपौत्रं महावीरमब्रुवन् देवि पार्वति ।
मुनयः –
संसर्गो हि सतां श्रेष्ठस्सर्वपुण्यफलप्रदः ॥ 2 ॥

यद्भवत्सङ्गतोऽस्माभिश्श्रुतमेतत्कथामृतम् ।
इति तैरादरादुक्तो महावीरो महामतिः ॥ 3 ॥

कृताञ्जलिपुटो धीमानिदं वचनमब्रवीत् ।
राजा –
अनुग्राद्धि विदुषां महतां मुनिसत्तमाः ॥ 4 ॥

अकृष्टपच्यतां याति सर्वा सिद्धिरपि क्षणात् ।
महाभागो नारदोऽयं महाभागवतोत्तमः ॥ 5 ॥

आनन्दमस्मत्कर्णानां ददौ दिव्यकथोक्तिभिः ।
इति हृष्टान्तरङ्गोऽथ मुनिभिस्सह भूमिपः
श्रीरङ्गनाथप्रीत्यर्थं गोभूस्वर्णान्यदात् क्षणात् ॥ 6 ॥

मुक्ताहारान् दुकूलानि राङ्कवाण्यपि सादरम् ।
श्रीरङ्गनाथकथां श्रुत्वा पार्वती प्रददौ बहु ॥ 7 ॥

श्रीरङ्गनाथमासेव्य मुनिभिः परिपूजिते
यथागतंगते श्रीमान्नारदे मुनिपुङ्गवे ॥ 8 ॥

आसेव्यसुबहूंस्तत्र दिवसान् रङ्गनायकम् ।
आराधयामस मुदा दृढां भक्तिं समुद्वहन् ॥ 9 ॥

In Public domain. Digitization Muthulakshmi Research Academy

उत्सवान् विविधांश्चक्रे महावीरो महामतिः ।
ततो गत्वा निजं देशं ध्यायन् श्रीरङ्गनायकम् ॥ 10 ॥

नित्यं रामायणं शृण्वन् प्राप्य पुत्रान्महाबलान् ।
इष्ट्वा बहुविधैर्यज्ञैर्दत्वा वित्तानि भूरिशः ॥ 11 ॥

निक्षिप्य राज्यं तनये धर्मपत्न्या सहानघः ।
पुनः प्राप्योत्तररङ्गं मुनिभिस्सहितोऽनघैः ॥ 12 ॥

आरराध बहून् वर्षान् रङ्गनाथं जगद्गुरुम् ।
तत्सेवनस्य कस्तृप्तो भवेद्भागवतोत्तमः ॥ 13 ॥

य एतच्छृणुयाद्देवि रङ्गमाहात्म्यमुत्तमम् ।
तस्य प्रसीदति हरिर्गरुडस्येव रङ्गराट् ॥ 14 ॥

भूकन्याश्वगजादीनि येऽत्र दास्यन्ति भामिनि ।
तेषां त्रिविष्टपे वास आचन्द्रार्कं सुमध्यमे ॥ 15 ॥

पार्वतीदं महत्क्षेत्रमत्र विप्रा महाधियः ।
पूता निर्धूतपाप्मानो ध्यायन्तो रङ्गनायकम् ॥ 16 ॥

यज्ञैर्दानैस्तपोभिश्च पूजयिष्यन्ति माधवम् ।
एतद्देशे धराधीशा भविष्यन्ति सुमध्यमे ॥ 17 ॥

महोदारश्शान्तधियो रङ्गनाथपरायणाः ।
रक्षकास्सर्ववर्णानां ब्राह्मणानामुपासकाः ॥ 18 ॥

शूराश्च कृतविद्याश्च कलावपि च सद्गुणाः ।
सर्वे वर्णा भविष्यन्ति स्वस्वधर्मपरायणाः ॥ 19 ॥

इदं पवित्रं पापघ्नं पुण्यं सर्वार्थसिद्धिदम् ।
श्रुत्वा विप्रस्सर्वशास्त्रवेत्ता भवति मानिनि ॥ 20 ॥

In Public domain. Digitization Muthulakshmi Research Academy

राजा श्रुत्वा रिपून् सर्वान् विना क्लेशेन भामिनि ।
यथा गरुत्मान् देवौघान् क्षणादेव विजेष्यते ॥ 21 ॥

परिपाल्य महीं सर्वां चक्रवर्ती भविष्यति ।
श्रुत्वा वैश्यास्तु वाणिज्ये परं लाभं प्रयान्त्यहो ॥ 22 ॥

शूद्राश्च भक्तिमन्तस्स्युर्ब्राह्मणेषु शुचिस्मिते ।
बहुना किमिहोक्तेन देवि पर्वतनन्दिनि ॥ 23 ॥

यः पठेच्छृणुयाद्वापि रङ्गमाहात्म्यमुत्तमम् ।
यद्यदिच्छेत्स पुरुषस्तत्तत्सर्वं समाप्नुयात् ॥ 24 ॥

श्रुत्वा गर्भवती नारी रङ्गेन्द्रचरितं महत् ।
विनतेव विहङ्गेन्द्रं प्रसूते पुत्रमुत्तमम् ॥ 25 ॥

पुत्राः पौत्राः प्रपौत्राश्च वर्धन्ते तस्य देहिनः ।
यस्य गेहे वसेन्नित्यं रङ्गमहात्म्यमुत्तमम् ॥ 26 ॥

यो लिखेन्मनुजो लोके श्रीरङ्गचरितं पुमान् ।
भवबन्धात्स मुक्तस्स्याद्विनता दास्यतो यथा ॥ 27 ॥

इदमतिशुभदं महर्घमार्षं गरुडगिरीन्द्रचरित्रमादरेण ।
पठ गिरितनुजे तवाखिलार्थः करगत एतदवेहि तत्वमार्ये ॥ 28 ॥

इति श्री भविष्योत्तरपुराणे उमामहेश्वरसंवादे श्रीमदुत्तररङ्गमाहात्म्ये दशमोऽध्यायः ।

॥ समाप्तमिदमुत्तररङ्गमहात्म्यम् ॥
॥ श्रीमदुत्तररङ्गेशाय नमः ॥
॥ श्रीश्रीनिवासब्रह्मतन्त्रपरकालमहादेशिकाय नमः ॥

In Public domain. Digitization Muthulakshmi Research Academy

अकारादिक्रमश्लोकसूची श्लोकसङ्ख्या

1. अकृष्टपच्यतां याति सर्वा सिद्धिरपि क्षणात् 10.5
2. अग्निर्भीत्या ततश्शैत्यं जगाम स्वेदवारिभिः 7.61
3. अग्रतः पातु रङ्गेन्द्रः पृष्टतः कश्यपाञ्चितः 7.22
4. अग्रतस्तस्य पक्षीन्द्रं बद्धाञ्जलिपुटं सुराः 8.13
5. अत ऊर्ध्वं किमकरो गरुत्मान् विनतासुतः 6.3
6. अतस्तेषु दया नार्हा विनतानन्दवर्धनः 8.35
7. अतस्सुधामुखं प्राहुरिमं नदवरं नृप 8.63
8. अतृप्तं तं सुतं दृष्ट्वा कश्यपो मुनिसत्तमः 7.16
9. अतृप्तचेताः पुनरप्यागत्य पितुरन्तिकम् 7.15
10. अतो गृहाण पक्षीन्द्र विमानमिदमुत्तमम् 5.57
11. अतो मातुर्ममोक्त्यैदं कर्तव्यमविचारतः 2.45
12. अत्र संस्थापयैतद्धि विमानं ब्रह्मपूजितम् 5.37
13. अत्रोपायो नान्य इन्द्र कर्तुं शक्यस्सुराधिप 8.5
14. अथ क्रुद्धो विहङ्गेन्द्र उच्चैर्गर्जन्महाबलः 7.51
15. अथ जग्राह कलशममृतस्य महामतिः 7.41
16. अथ तद्वीक्षणाद्भीतः कश्यपोऽपि कृताञ्जलिः 7.12
17. अथ तस्य तपश्चर्यासन्तुष्टहृदयो हरिः 9.8
18. अथ तुष्टाव देवेशं भक्तिनिर्भरमानसः 5.19
19. अथ तृप्तः प्रसन्नात्मा विनतान्दवर्धनः 7.20
20. अथ दीनस्सुराधीशः पराभूतो गरुत्मता 8.1
21. अथ दृष्ट्वा गिरिवरं वैनतेयः खगाधिपः 5.1
22. अथ नित्यं वहन् सर्वान् महतो विनतात्मजः 4.1

In Public domain. Digitization Muthulakshmi Research Academy

23. अथ प्रसन्नस्तत्पूजाविशेषाद्रङ्गनायकः 6.35
24. अथ प्रसन्ने रङ्गेशे त्वामस्मान्मोचयाम्यहम् 4.32
25. अथ प्रसन्नो भगवानाविरासीच्छ्रियःपतिः 4.22
26. अथ प्राप महातेजाः पश्चिमं रङ्गमन्दिरम् 1.25
27. अथ वर्षसहस्रं त्वं परिपालय ते उभे 3.7
28. अथ वर्षसहस्रान्ते मन्त्रमाहत्म्यतस्तव 3.21
29. अथ शुश्राव निनदं तूर्यदुन्दुभिसम्भवम् 1.45
30. अथ स किल गरुत्मान् सर्वमेतन्महात्मा 7.73
31. अथ संवत्सरस्यान्ते मीनमासे जगत्पतिः 5.8
32. अथ हृष्टः पक्षिराजः क्षणेनातित्वरान्वितः 4.41
33. अथाभिवन्द्य रङ्गेन्द्रं कद्रूवाक्यं व्यजिज्ञिपत् 7.1
34. अथैषापि शुचीभूय विनता तं महामनुम् 3.13
35. अथोपदिष्टं गुरुणा तं मन्त्रं मनसा स्मरन् 4.28
36. अदक्षेत्राणि संसेव्य तत्राष्टादश भूपतिः 1.21
37. अद्य गर्भवती त्वं हि विनते मृदुभाषिणि 3.6
38. अनूरुसारथिं प्राहुस्तदाप्रभृति पूषणम् 3.23
39. अपि चैतत्प्रवक्ष्यामि हितं विहगसत्तम 8.23
40. अपि दृष्टस्तुरङ्गोयं विनते ब्रूहि भामिनि 2.23
41. अपि मातृसपत्न्यास्ते सम्प्रदास्यसि चेत्खग 8.24
42. अभिगम्य ततो मातुर्भवनं (...खग) सत्तमः 6.57
43. अमर्त्यता बाधिकाऽभूत्तेषां युद्धे गरुत्मता 7.58
44. अमृताहरणं वीर तृणाय मनुते स्म सः 6.56
45. अम्ब पित्रा महान्मह्यमुपदिष्टः परो मनुः 4.30

In Public domain. Digitization Muthulakshmi Research Academy

46. अम्ब प्रसन्नो रङ्गेन्द्रश्श्रीमान् मद्वशोऽभवत् 6.58
47. अम्ब सर्वास्ववस्थासु त्वरा कार्यविघातिनी 3.19
48. अम्बास्मदम्बां मुञ्च त्वं यद्यदिच्छसि सुव्रते 6.46
49. अयि वत्स मदीयानि वाक्यानि शृणु मा शुचः 4.9
50. अवादयन् दुन्दुभितालमर्दलं 8.66
51. अविदूरे तस्य गिरेर्नदे स्नात्वा महीपतिः 1.44
52. अविरास जगन्नाथः कोटिमन्मथसुन्दरः 1.50
53. अश्रूयत ततो व्योम्नि काहलीनादमेदुरः 5.10
54. अष्टतीर्थ्यां ततस्स्नात्वा परिधानशिलामपि 1.30
55. अष्टाक्षरमहामन्त्रदैवतं घनसुन्दरम् 1.33
56. अस्य क्षेत्रस्य महात्म्यं श्रोतुं त्वद्वदनाम्बुजात् 2.13
57. अहे सापत्न्यविद्वेषो दुर्वारो भुवनत्रये 8.52
58. अहो भाग्यमहो भाग्यमहो भाग्यमिदं महत् 5.52
59. अहो हरेर्भक्तजनेष्नुग्रहो 8.67
60. आगतं नारदं दृष्ट्वा सर्वे ते मुनिसत्तमाः 2.4
61. आगतानागतान् वीरो दारयामास वेगवान् 7.60
62. आगतोऽसि कुतो हेतोरिह राजर्षिसत्तम 2.9
63. आगतोऽसि त्वमप्यद्य दिव्यमत्रत्यवैभवम् 2.14
64. आग्नेय्यां ब्रह्मभूमीध्रशिखरालिविभूषणम् 7.23
65. आचामन्निव सप्तापि समुद्रान् दृढविक्रमः 7.29
66. आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः 8.9
67. आनन्दमयसंज्ञेऽथ विमाने ब्रह्मणार्चिते 1.31
68. आनन्दमस्मत्कर्णानां ददौ दिव्यकथोक्तिभिः 10.6

 In Public domain. Digitization Muthulakshmi Research Academy

69. आपत्सखं महाभागं ब्रह्मणाराधितम् पुरा 5.49
70. आपृच्छ्य कुशलं सर्वानग्रेऽपश्यद्धरापतिम् 2.7
71. आरराध बहून् वर्षान् रङ्गनाथं जगद्गुरुम् 10.13
72. आवर्तयन् वर्षमेकं भगवद्दत्तमानसः 4.21
73. आवेदितपदन्यासः कुमुदाक्षेण भक्तितः 5.14
74. आशिषं कुरु बालानां मातुराशीस्सुखावहा 6.60
75. आशीविषाश्च पीत्वा तदवधार्हा भवन्ति ते 8.25
76. आसेव्यसुबहूंस्तत्र दिवसान् रङ्गनायकम् 10.9
77. आहृत्य चामृतं स्वर्गात्तदिष्टं परिपूरयन् 6.59
78. इति किल गदितो मुनिव्रजैस्तैर्मुदितमना 1.60
79. इति तत्र तपस्तेपे भगवद्दर्शनोत्सुकः 4.19
80. इति ध्यात्वा महामन्त्रं जप नित्यमतन्द्रधीः 4.37
81. इति ध्यात्वा स कवचं सर्वतो निर्भयो मुहुः 7.25
82. इति ध्यात्वा सनियमं नित्यं नियतमानसा 3.11
83. इति मुदितमनस्सु तेषु देवेष्वनुदिनम 8.68
84. इति रक्षां तदा चक्रे वात्सल्यात्तनुजस्य सा 6.63
85. इति श्रुत्वा वचस्तस्य रङ्गनाथः कृपानिधिः 8.20
86. इति श्रुत्वा वचो देव्याः किञ्चित्क्रोधारुणेक्षणः 6.45
87. इति सपदि स जित्वा सर्वदिक्पालसङ्घान् 7.72
88. इति स्वं स्वं वचो देव्यौ साधयन्त्यौ परस्परम् 2.30
89. इत्थं वदति देवेशे पुण्डरीकेक्षणे क्षणात् 5.39
90. इत्थं संवत्सरं धीमान् यथोक्तं तं महामनुम् 5.7
91. इत्थं हि कद्रा विनतापि वञ्चिता 2.51

In Public domain. Digitization Muthulakshmi Research Academy

92. इत्थमाकार्यमाणोऽपि विनतानन्दनेन सः 7.70

93. इत्याख्याय मुनीन् सर्वान् श्रीरङ्गेन्द्रं प्रणम्य 2.18

94. इत्यालोच्याब्रवीत्कद्रूर्विनतामुत्तरं वचः 2.39

95. इत्युक्तवति पक्षीन्द्रे खिन्नास्ते फणिनो जवात् 8.58

96. इत्युक्तवति पक्षीन्द्रे हृदि कद्रूरचिन्तयत् 6.47

97. इत्युक्तवत्यां राजेन्द्र विनतायां ततःपरम् 2.25

98. इत्युक्तवत्यां सा कद्वां विनताप्यब्रवीत्पुनः 2.33

99. इत्युक्तवन्तं तं तनुजं विनता वाक्यमब्रवीत् 4.33

100. इत्युक्तवन्तं पुत्रं तं वीक्ष्य ज्ञात्वा तदाशयम् 4.8

101. इत्युक्तस्तेन पित्राथ गरुत्मान् कृतमङ्गलः 6.68

102. इत्युक्तस्तेन राज्ञाथ नारदस्स महातपाः 3.2

103. इत्युक्तास्ते ततो मात्रा भुजगा अतिमेचकाः 2.46

104. इत्युक्तो गरुडस्तूर्णं पप्लुवेऽथ नभस्स्थलम् 6.41

105. इत्युक्तो गुरुणा शक्रस्सह सर्वैर्मरुद्गणैः 8.10

106. इत्युक्तो नारदेनाथ महावीरः प्रतापवान् 2.10

107. इत्युक्तो रङ्गनाथेन तस्य कृत्वा प्रदक्षिणम् 7.5

108. इत्युक्तो रङ्गनाथेन भक्तिमान् विनतासुतः 8.43

109. इत्युक्तो रङ्गनाथेन विनतातनुजो मुदा 6.38

110. इत्युक्तो रङ्गनाथोऽसौ क्षेत्रादस्मान्महामते 9.19

111. इत्युक्तो विनतासूनुः पुण्डरीकेक्षणेन सः 5.26

112. इत्युक्त्वा विनता गन्तुं कद्वाः करमथाग्रहीत् 2.36

113. इत्युक्त्वा विनता सूनुं रक्षां कृत्वा यथाविधि 4.40

114. इत्युक्त्वां तर्हि ते देवे प्रबुद्धा विनता तदा 3.26

In Public domain. Digitization Muthulakshmi Research Academy

115. इत्युक्त्वाचम्य पूताय तस्मै तं मन्त्रमुत्तमम् 4.27
116. इत्युच्चैर्हर्षभारेण नृत्यन्तं तं वीक्ष्य माधवः 5.53
117. इदं पवित्रं पापघ्नं पुण्यं सर्वार्धसिद्धिदम् 10.20
118. इदं रङ्गस्थलं प्राप्य स्नात्वा दिव्ये सुधामुखे 9.16
119. इदमतिशुभदं महर्घमार्षं गरुडगिरीन्द्रचरित्रम10.28
120. इदमस्पृश्यमशुचीभूतैरिति निगद्य च 8.38
121. इदानीं बालकृष्णं तं वेणुनादविनोदिनम् 9.17
122. इमं मन्त्रमुपादिक्षं तव पित्रेऽहमत्र वै 5.35
123. इमं सुधामुखं प्राहुर्नदं च नृपसत्तम 1.55
124. इमां हि रङ्गनाथाख्यां प्रतिमां विद्धि मानद 5.31
125. ईशान्यमीश्वरस्साक्षादूर्ध्वं गरुडपूजितः 7.24
126. उत्सवान् विविधांश्चक्रे महावीरो महामतिः 10.10
127. उदग्रशृङ्गोल्लिखितार्कमण्डलं 4.43
128. उदारं समीक्ष्याथ तद्व्योमयानं 5.59
129. उवास कतिचिन्मासांस्तत्र वीरो महामतिः 1.13
130. एतन्मङ्गलरङ्गाख्यं विमानं पुण्यमुत्तमम् 5.32
131. एतस्मिन्नन्तरे तत्र मायया मोहिता हरेः 8.54
132. एतस्मिन्नन्तरे दूतैरिदं वृत्तं गरुत्मतः 7.42
133. एतस्मिन्नन्तरे वी रमन्मायामोहिताश्च ते 8.39
134. एतैरष्टोत्तरशतनामभिर्विनतासुतः 6.34
135. एवं निर्धूय तान् सर्वानुन्नद्योच्चैः प्रतापवान् 7.71
136. एवं प्राच्यां महाभाग तपस्यन्तं महामतिम् 9.13
137. एवं यदि ततो दास्यं विनता मे समेष्यति 2.44

In Public domain. Digitization Muthulakshmi Research Academy

138. एवमष्टोत्तरशतं नाम्नामेतस्य यः पठेत् 6.32
139. एवमिन्द्रादयो देवा मीनमासे जगत्पतिम् 9.25
140. एवमुत्तरतो योगी भरद्वाजस्तपश्चरन् 9.11
141. ओं नमो रङ्गनाथायेत्येतमष्टाक्षरं मनुम् 4.24
142. कथयित्वा कश्यपाय रङ्गेन्द्रसदनुग्रहम् 6.42
143. कथितमिदमुदारदिव्यवृत्तं 9.27
144. कदाचित्ते उभे देव्यौ सपत्न्यावम्बुधेस्तटम् 2.21
145. कदाचिदेष रङ्गेन्द्रस्त्वन्मन्त्रोपास्यदेवता 5.55
146. कद्रूसमीपं सम्प्राप्य नत्वा तामिदमब्रवीत् 6.43
147. कद्रूसमीपं सम्प्राप्य वाक्यमेतदुवाच ह 8.44
148. कमलैरपि कह्लारैः पाटल(.....)कैः 6.7
149. कम्बुग्रीवं विशालाक्षमुन्नसं चारुकुण्डलम् 5.47
150. कश्चित्ते कुशलं राजन् कश्चिद्धर्माश्च रक्षिताः 2.8
151. कश्यपेन यथाज्ञप्तं तथा कुर्वन् खगोत्तमः 7.7
152. कष्टं कष्टं महाभाग भूमावकपटात्मनाम् 2.50
153. कस्यचित्त्वथ कालस्य दुःखितः परसेवया 4.4
154. कस्याप्यवश्यमाहुस्त्वां को वेद तव चेष्टितम् 5.22
155. काचित्साकं गरेणैव ज्ञातं तं सगरं विदुः 8.53
156. कात्यायनोऽथ जाबालिस्सु यज्ञो विजयोऽपि च 2.5
157. काश्यपक्षेत्रभूकान्तालङ्कारतिलकायितम् 8.11
158. किं तत्क्षेत्रं को नु मन्त्रः ब्रूहि मे मुनिसत्तम 4.11
159. किं तदष्टोत्तरशतं ना(मानि?) (नारद?..)र्षिसत्तमः 6.9
160. किं वा करिष्यति ततः को वेदास्य पराक्रमम् 6.49

In Public domain. Digitization Muthulakshmi Research Academy

161. किन्नु कार्यमथेदानीं दुर्जयोऽसौ खगोत्तमः 8.4
162. किन्नु खेदावहं पुंसां धीराणां परसेवनात् 4.7
163. किमकारि महाभाग ततो विनतयानया 3.1
164. कुमुदादिगणाधीशा अग्रतः प्रययुर्मुदा 5.12
165. कुशपौत्रं महावीरमब्रुवन् देवि पार्वति 10.2
166. कृतप्रतिज्ञामादेहं मद्दास्ये मातरं तव 6.44
167. कृतरक्षो विनतया कश्यपञ्च प्रणम्य सः 6.64
168. कृताञ्जलिपुटो धीमानिदं वचनमब्रवीत् 10.4
169. कृतोत्तरीयं राराजत्पीतकौशेयवाससा 5.45
170. कृपया मयि तद्रूपं दर्शय त्वं जगत्पते 9.18
171. कृपालवो महात्मानो यदिच ज्ञातयो भुवि 8.32
172. कृष्णं पुच्छं तस्य दृष्ट्वा कद्रूस्सा मुमुदेतराम् 2.48
173. केषुचिद्दिवसेष्विव मती तेषु महीपते 3.14
174. कैतवाद्यत्त्वदम्बायै दास्यं कद्रूर्ददौ पुरा 8.42
175. कोटिसूर्यप्रतीकाशं किङ्किणीशतमेदुरम् 5.40
176. क्रुद्धवद्राजते किञ्चिद्युक्तं नात्रोत्तरोत्तरम् 6.48
177. क्रोधारुणितनेत्रौघो वज्रं सपदि कम्पयन् 7.44
178. क्वचिड्डिण्डीरखण्डाढ्यं क्वचिद्विद्रुममेदुरम् 1.11
179. क्षणं तिष्ठ महाभाग विद्मस्त्वां नृपसत्तमम् 1.56
180. क्षणेनाथमहातेजाः प्रविवेशामरावतीम् 7.31
181. क्षेत्राणि यानि प्रोक्तानि परितो गरुडाचलम् 9.2
182. खगाय तस्मै चिक्षेप वज्रं स्वं तादृशं महत् 7.48
183. खेदो न युज्यते ह्यस्य भ्रातुस्तव ममापि च 8.41

In Public domain. Digitization Muthulakshmi Research Academy

184. गच्छ वत्स गृहं तूर्णं कद्रूं पृच्छ वचो हितम् 6.40
185. गजकच्छपरूपेण कलहं तनुतोऽनिशम् 6.66
186. गत्वा तद्वचनाद्ब्रह्मभूधरं नियतात्मना 4.31
187. गत्वा समीवं पश्यामस्सर्वं च ज्ञास्यते ततः 2.35
188. गरुडाद्रिशिरोभूषा गाम्भीर्यविजिताम्बुधिः 6.22
189. गरुडोऽपि प्रहृष्टात्मा पितृभ्यां साकमादरात् 8.64
190. गरुडोऽपि महाभागस्सुधामुखनदेऽनिशम् 9.24
191. गरुढस्य तपश्चर्यासन्तुष्टमनसा पुरा 1.53
192. गव्यूतिमात्रं पन्थानमतिचक्राम राघवः 1.39
193. गुरो कथं नु कर्तव्यं सुधाकलशमुत्तमम् 8.3
194. गुहासु तत्रतत्राथ क्रीडद्भिस्सिद्धकिन्नरैः 1.43
195. घनाघनान् समाकर्षंस्तारा व्याकुलयन्मुहुः 7.27
196. चरणाभ्यामुभाभ्यां च गृहीत्वा गजकच्छपौ 7.11
197. चूतैः पटीरैः पनसैर्निम्बैर्नीपैश्च केसरैः 1.40
198. जगर्ज प्रलयस्यान्ते पर्जन्य इव मूर्तिमान् 7.30
199. जनकं प्रणम्य विनतातनुजः प्रमदेन 6.69
200. जप त्वं विनते तन्वि दुःखादस्माद्विमोक्ष्यसे 3.12
201. जय्या अपि दुराधर्षा भवन्ति महदाश्रयात् 7.50
202. जरा(.....)हरो देवो जयदो जाड्यनाशनः 6.18
203. जायते देवि पुत्रस्ते महात्मा मदनुग्रहात् 3.25
204. ज्ञातयो ये दुरात्मानस्तेषु नार्हा दया क्वचित् 8.28
205. ज्ञातिर्बालोऽपि नोपेक्ष्यस्सर्वं व्याप्नोत्यतः परम् 8.30
206. ज्ञानवृद्धो हि वृद्धेषु श्रेष्ठस्सद्भिः प्रगण्यते 6.51

In Public domain. Digitization Muthulakshmi Research Academy

207. तं तदा दीनवदनं विलोक्य गरुडं सुतम् 4.6
208. तं देशं प्राप गोविन्दो यत्रास्ते विनतासुतः 5.15
209. तं वीक्ष्य क्रोधताम्राक्षश्शुने मत्वामराधिपम् 7.36
210. तं वीक्ष्य लीलया कद्रूरब्रवीद्विनतां तदा 2.22
211. तच्छ्रुत्वा कश्यपो धीमान् अधर्म्यं दुस्सहं तदा 3.4
212. तच्छ्रुत्वा भगवान् स्मित्वा प्राहैनं विनतासुतम् 7.2
213. ततः कदाचिन्निद्रालौ विनतायां श्रियःपतिः 3.24
214. ततः कद्रूरुवाचैनां दास्यं कर्तव्यमित्युत 2.49
215. ततः करतले दिव्यां वीणां सपदि वादयन् 2.3
216. ततः पलायमानं तं वीक्ष्य शक्रं खगाधिपः 7.66
217. ततश्शक्रः प्रशान्तात्मा बद्धाञ्जलिपुटो हरिम् 8.15
218. ततश्शेषे शयानं तं पुण्डरीके मिलिन्दवत् 1.18
219. ततस्तद्भक्षणात्त्वं हि सर्वेष्वपि बलाधिकः 6.67
220. ततस्तेनैव मन्त्रेण कृत्वा रक्षां तयोस्तदा 3.15
221. ततस्सर्पाश्च कलशं सुधाया नैव वीक्ष्यते 8.56
222. ततस्सर्वार्थसिद्धिं ते विधास्यति जगत्पतिः 4.10
223. ततस्सा दास्यनिर्मुक्ता विनतात्यन्तहृष्टधीः 9.23
224. ततो गत्वा ताम्रपर्णीं स्नात्वा तत्र यथाविधि 1.14
225. ततो गत्वा नृसिंहं च संसेव्य घटिका च ते 1.23
226. ततो ददर्श तत्र भोगीन्द्रे शयानं रङ्गनायकम् 1.46
227. ततो ददर्श विपुलं तुङ्गवीचिभिराकुलम् 1.7
228. ततो ददर्श विपुलां दिव्यां शीतजलां नदीम् 1.37
229. ततो दास्ये वसन्ती सा कश्यपं दयितं निजम् 3.3

In Public domain. Digitization Muthulakshmi Research Academy

230. ततो वेलापुरीभागे केशवं वीक्ष्य भूपतिः 1.35
231. ततो व्योम्नि महत्तेजस्तादृशं समजायत 2.1
232. ततोऽस्मदम्बा मुच्यते दास्यादस्मात्सुराधिप 7.35
233. तत्र दृष्ट्वा महाभागं गुरुं नैजं बृहस्पतिम् 8.2
234. तत्र द्वौ हि जनिष्येते महावीरौ महामती 3.8
235. तत्र मङ्गलरङ्गेऽथ विमाने दिव्यकान्तिनि 8.12
236. तत्र संसेव्य रङ्गेन्द्रमादिरङ्ग इव स्थितम् 1.24
237. तत्र संसेव्य रङ्गेन्द्रमादिरङ्ग इव स्थितम् 1.26
238. तत्र सर्वेऽपि देवास्ते गरुडाङ्गे मुहुर्मुहुः 7.53
239. तत्रापि तत्तपस्तुष्टश्श्रीनिवासाकृतिर्हरिः 9.12
240. तत्रामुं रङ्गनाथस्य मन्त्रं जप महामते 4.26
241. तत्रैको ब्राह्मणोऽह्यस्ति तं मुञ्च त्वं वितन्द्रधीः 7.18
242. तथात्र सन्निधिं नित्यं करोमि विनतासुत 5.38
243. तथाप्यसाध्यं किमपि वच्मि किं वा करोत्वसौ 6.52
244. तथाविधं तं संवीक्ष्य विस्मितोऽभूद्धरापतिः 1.48
245. तथोपायं प्रवक्ष्यामि शृणु त्वं विनतासुत 8.37
246. तदा कुरुपतिक्षेत्रमिति तस्य प्रथाभवत् 9.10
247. तदा पलायनं चक्रे यमोऽपि नियमं विना 7.62
248. तदाक्रूरक्षेत्रमिति कथयिष्यन्ति तद्विजाः 9.22
249. तदाप्रभृति तत्प्राहुः परितो योजनाष्टकम् 4.25
250. तदाश्रितान् वालखिल्यान् दृष्ट्वा भीतमनाः 7.10
251. तद्दृष्ट्वा मुनयस्सर्वे सम्प्रहृष्टतनूरुहाः 2.2
252. तद्यूयं बालकाः कृष्णा वाला भूत्वा मदाज्ञया 2.43

In Public domain. Digitization Muthulakshmi Research Academy

253. तद्विलोक्य ततश्छिद्रमपहृत्य सुराधिपः 8.55
254. तधीश्शेषशयनो नीलाम्बुदनिभाकृतिः 6.20
255. तन्मध्य एव चापल्याद्विनता स्त्रीस्वभावजात् 3.16
256. तपस्यता वेधसा सा प्राक्तत्रास्नायि यतो मुहुः 4.17
257. तमालसालाम्ररसालवञ्जुल 4.44
258. तमासेव्य ततस्तुत्वा काञ्चीं प्राप्य ततः 1.19
259. तमेवोत्तररङ्गेन्द्रं प्रार्थयामो वयं हरे 8.6
260. तस्माद्गत्वा तपस्तप्त्वा प्रसन्ने रङ्गनायके 4.39
261. तस्मिन्नेव ततः काले सुरेशस्यास्य धीमतः 8.40
262. तस्या गव्यूतिमात्रेऽस्ति महान् ब्रह्ममहीधरः 4.13
263. तां विसृज्य ततश्शाखां मेरोः पार्श्वे खगोत्तमः 7.14
264. तादृशामृतसंसर्गाद्दर्भाणां च पवित्रता 8.61
265. तुलयन्तं मेघमिन्द्रधनुर्विद्युद्विचित्रितम् 5.46
266. ते ततः प्रार्थनात्तस्य वालखिल्या महीपते 7.13
267. ते नाथ नाम्नां विहगसत्तमः 6.8
268. तेजसा गरुडस्याथ मुहुरन्धीकृतास्सुराः 7.59
269. तेनापि साकं तनुजेन दास्यं 3.31
270. तेनावस्क्रियमाणास्ते गरुडेन दिवौकसः 7.56
271. त्रैलोक्याधिपतेः खेदाद्भ्रातुरस्य महात्मनः 8.27
272. त्वरया तेषु गच्छत्सु देवेषु कलशाग्रतः 8.62
273. त्वरस्व त्वं महाभाहो गच्छामो रङ्गमन्दिरम् 8.8
274. त्वां सदार्चयितुं देव कङ्क्षामि कमलेक्षण 5.28
275. ददंश दशनैः कांश्चित्पक्षात्कांश्चिदपोथयत् 7.52

In Public domain. Digitization Muthulakshmi Research Academy

276. दर्भसङ्घर्षणाज्जिह्वा द्विधा तेषां व्यशीर्यत 8.59
277. दाडिमैः कुरवैश्चैव तिन्त्रिणीभिः पलाशकैः 1.41
278. दातुं ते काङ्क्षितं साक्षादागतो भगवानिह 5.17
279. दिव्याभ्यां शङ्खचक्राभ्यां विराजितभुजद्वयम् 5.50
280. दिव्ये मङ्गलरङ्गाख्ये विमाने तत्र भासुरम् 5.41
281. दुरात्मानस्तु पक्षीन्द्र महात्मानमपि क्षणात् 8.33
282. दुर्जयं तं ततो ज्ञात्वा कवचेनाभिरक्षितम् 7.54
283. दुष्टपूर्वो महाभागे तुरगोऽयं नभस्सदाम् 2.24
284. दुस्सङ्गाद्दुष्टवृत्तानां श्रवणं भवति ध्रुवम् 1.59
285. दुस्साधममरावत्यां यदास्ते देवरक्षितम् 6.54
286. दृष्टं च ताभ्यामेतद्धि विमानं खगसत्तम 5.34
287. दृष्ट्वा तं विनतासूनुमेवमानन्दनिर्भरम् 5.24
288. दृष्ट्वा हृष्टान्तरङ्गासीत्तनूजं विनतानिजम् 3.30
289. देयं सुधायाः कलशं मह्यं विहगपुङ्गव 8.47
290. देवदेव जगन्नाथ त्वद्भक्तेन गरुत्मता 8.17
291. देवदेवं हृदि ध्यायन् हर्षनिर्भरमानसः 7.21
292. देवि नात्र भयं कार्यमुपदेक्ष्यामि तेऽनघे 3.5
293. धन्योऽस्म्यनुग्रहीतोऽस्मि सेवयाऽस्य रमापतेः 1.51
294. धन्योऽहं त्वन्मुखाम्भोजाच्छ्रुत्वा दिव्यकथामिमां 9.1
295. न दया तेषु कर्तव्या प्रणता इति सत्तम 8.29
296. न विषीदेद्यथा चायममृताहरणादिह 8.22
297. न शक्तस्त्वामहं त्रातुमण्डमेतच्छुचिव्रते 3.20
298. न सहेऽहं तदेतत्त्वं निवारयितुमर्हसि 5.30

In Public domain. Digitization Muthulakshmi Research Academy

299. नदेन ब्राह्मसंज्ञेन सर्वपापविनाशिना 4.16
300. नमः पद्मनिभाक्षाय नमस्ते सर्वमूर्तये 5.20
301. नमस्ते गरुडाद्रीश नमस्ते गरुडप्रिय 8.16
302. नरवाहनसादृश्यमवाप नरवाहनः 7.64
303. नातिवर्तेत तस्याज्ञां कदापि दृढधीरयम् 8.7
304. नानाविधमणिन्युप्तसुवर्णमकुटोज्वलम् 5.48
305. नारद त्वं माहाभाग त्वत्तो भागवतोत्तमः 6.1
306. नारायणाष्टाक्षरेण सम्पुटीकुरु तं मनुम् 4.34
307. नारायणो नारदेड्यो नानारूपविहारभृत् 6.24
308. नासाग्रन्यस्तनयन उरो विष्टभ्य चात्मवान् 5.6
309. नासाग्रन्यस्तनयनमब्रवीद्गरुडं मुदा 5.16
310. निक्षिप्य राज्यं तनये धर्मपत्न्या सहानघ 10.12
311. निगृहीतुं समर्थोऽपि तान् मात्राज्ञावशंवदः ।4.3
312. नित्यं रामायणं श्रृण्वन् प्राप्य पुत्रान्महाबलान् 10.11
313. निर्द्वन्द्वो नित्यलक्ष्मीको निर्योगक्षेम उ(.....) 6.17
314. नीचदुश्चेष्टितं तेषामिदानीमेव दुस्सहम् 8.26
315. नीलाम्बुदनिभाकरं पुण्डरीकायतेक्षणम् 1.22
316. नूनमद्य समायातः कालोऽस्या वञ्चनाय हि 2.26
317. नेदं युक्तं हि शूरस्य युद्धरङ्गात्पलायनम् 7.68
318. पक्षोर्धूननसञ्जातमरुत्कम्पितदिक्तटः 7.26
319. पञ्चभागवतक्षेत्रं तत्रैवासेव्य भूपतिः 1.29
320. पयोमयं च परिखमेकमग्निमयं तथा 7.37
321. परमात्मा देवतास्य प्रसादे विनियुज्यते 4.35

In Public domain. Digitization Muthulakshmi Research Academy

322. परितोऽप्यमृतस्थानं रक्षणं स ददर्श ह 7.38
323. परिपाल्य महीं सर्वां चक्रवर्ती भविष्यति 10.22
324. पलायमानांस्तान् दृष्ट्वा जगर्ज सहसा खगः 7.55
325. पाताले पूजितश्श्रीमानेतावत्कालमादरात् 5.56
326. पारिजाताप्रसूनाद्यैर्गरुडाद्रिविभूषणम् 9.26
327. पार्वतीदं महत्क्षेत्रमत्र विप्रा महाधियः 10.16
328. पुत्राः पौत्राः प्रपौत्राश्च वर्धन्ते तस्य देहिनः 10.26
329. पुरा कृष्णातटे क्वापि पर्वते ब्रह्मसंज्ञिते 3.9
330. पुरा हि कृतवैरौ द्वौ मुनुजौ खगसत्तम 6.65
331. पुरात्रैव गिरौ ब्रह्म मद्दर्शनसमुत्सुकः 5.33
332. पुरारण्ये वसन् राजा भरतः कुरुसत्तमः 9.5
333. पुष्पितैः फलितैर्वृक्षैस्सर्वतः परिवारितम् 1.42
334. पूतनामा पुण्यशीलः पुरान्तकभयान्तकः 6.26
335. पूर्णे वर्षसहस्रेऽथ भित्वाण्डं पूरविग्रहः 3.27
336. प्रजगुर्देवगन्धर्वा ननृतुश्चाप्सरोगणाः 5.11
337. प्रणम्य सर्व एवैतेतत्सौन्दर्यविलोकनात् 8.14
338. प्रणेमुस्सहसा भूमौ साष्टाङ्गं भक्तिनिर्भराः 2.6
339. प्रदक्षिणीकृत्य गिरिं शतकृत्वः खगेश्वरः 5.3
340. प्रविश्याथ कृतस्नानो राजपुष्करिणीजले 1.17
341. प्रसन्नात्मा प्रसन्नास्यः प्राज्यकीर्तिः 6.25
342. प्रागेवोक्तं मया साधु रक्षतेति भुजङ्गमाः 8.57
343. प्राचीनाग्रेषु दर्भेषु स्थापयामास तां सुधाम् 8.48
344. प्राच्यां कुरुपतिक्षेत्रात्कृष्णाया उत्तरे तटि 4.14

 Digitized by Arya Samaj Foundation Chennai and eGangotri. In public domain. Digitization Muthulakshmi Research Academy

345. प्राच्यां वराहं संसेव्य सीतारण्यं च दक्षिणे 1.28
346. प्रातरुत्थाय कद्रूश्च तया विनतया सह 2.47
347. प्राप श्रीरङ्गनगरीम् उच्चैरामुक्तकेतनाम् 1.15
348. फलं विरिञ्चियज्ञस्य देवदेवं जगत्पतिम् 1.20
349. फलभक्षः पर्णभक्षः पयोमारुतभक्षणः 5.5
350. बद्धुमिन्द्राज्ञयात्मानमागतानमरांस्तदा 7.46
351. बधानैनमिति क्रोधाद्भृत्यवर्गान् वदन्मुहुः 7.45
352. बभञ्जाण्डं तयोरेकं तत्रापश्यत्तनूभवम् 3.17
353. बालचन्द्रोपमाभाभ्यां दंष्ट्राभ्यां च विराजितम् 3.29
354. ब्देनता च श्रीमदुत्तररङ्गराट् 6.11
355. ब्रह्मणाराधितं पूर्वं सनाकादि तपःफलम् 1.32
356. ब्रह्माद्रिनिलयश्श्रीमान् (.....)ता श्रियः पतिः 6.14
357. ब्राह्मणगिरेः पश्चिमे कटके मुदा 6.6
358. भक्तेष्वस्मासु रङ्गेन्द्र नोपेक्षां कर्तुमर्हसि 8.19
359. भगवंस्त्वत्पदाम्भोजसेवनादद्य माधव 5.23
360. भगवंस्त्वत्पदाम्भोजसेवनान्नास्ति मे हरे 5.27
361. भगवान् कश्यपः कुप्येत्तत्रैव स्थीयते यदि 2.40
362. भगवान् प्रहृष्टोऽस्मि महाबाहो तात ते 6.36
363. भिल्लैर्दुष्टैः परिवृतां फल्लीं सपदि भक्षयन् 7.19
364. भुक्त्यभावेऽपि निस्वानां वर्धन्ते बहवः प्रजाः 8.60
365. भूकन्याश्वगजादीनि येऽत्र दास्यन्ति भामिनि 10.15
366. भ्रातस्तात सुधां पूर्वं याचितस्त्वं मया हरे 7.67
367. मकुटीतटविन्यस्तदिव्यदक्षिणदोर्घनः 6.30

In Public domain. Digitization Muthulakshmi Research Academy

368. मथितामृतफेनाभदुकुलेन विभूषितम् 5.44
369. मधुकैटभसंहर्ता मधुराकृतिरूर्जितः 6.28
370. मनोज्ञैर्नन्दनोद्यानैर्दिव्यैस्सकवचामिव 7.32
371. मपहर्ता मे दद्याच्छ्रियमनुत्तमाम् 6.13
372. ममैव वितथं वाक्यं भविष्यति ततो मया 2.38
373. मया तु कृष्ण इत्येव शपथो रचितो महान् 2.42
374. मयापि तत्पदाम्भोजभक्तेरन्यन्न याचितम् 4.23
375. मयोक्तं कवचं नित्यं पठ वीर जयावहम् 7.3
376. महाकायं महासत्वं सपक्षमिव पर्वतम् 3.28
377. महात्मना दुरात्मानो रक्षिता अपि सत्तम 8.34
378. महोदारश्शान्तधियो रङ्गनाथपरायणाः 10.18
379. मह्यं दास्यसि चेद्दास्यान्मातरं मोचयामि ते 6.55
380. माता सीदति दास्येन सपत्न्या रङ्गभूपते 6.39
381. मातुरन्तिकमासाद्य वैनतेयो महाबलः 4.29
382. माधवो मरुदाह्लादी शङ्खचक्रधरोऽमलः 6.29
383. मानी मान्यो मानदाता मातृवत्सर्वपालकः 6.27
384. मुकुराकृतिराराजत्सुकपोलो दयानिधिः 6.23
385. मुक्तामयविभूषां ते हरिनीलमिवोज्वलम् 5.42
386. मुक्ताहारान् दुकूलानि राङ्कवाण्यपि सादरम् 10.7
387. मुनीन् समभिवन्द्याथ तत्रत्यान् विनतासुतः 5.4
388. मुहुः प्रणम्य साष्टाङ्गं विजये कृतमानसः 7.6
389. य एतच्छृणुयाद्देवि रङ्गमाहात्म्यमुत्तमम् 10.14
390. यः पठेच्छृणुयाद्वापि रङ्गमाहात्म्यमुत्तमम् 10.24

 In Public domain. Digitization Muthulakshmi Research Academy

391. यज्ञैर्दानैस्तपोभिश्च पूजयिष्यन्ति माधवम् 10.17
392. यत्र यत्र भुजङ्गास्ते यद्यदिच्छन्ति सर्वदा 4.2
393. यथा मुञ्चेन्मातरं ते कद्रूर्दास्यात्खगोत्तम 8.36
394. यथावदादितो वृत्तं रङ्गनाथस्य सत्तमाः 1.52
395. यदि चास्मद्वचस्सुभ्रु वितथं तर्हि ते गृहे 2.32
396. यदुवंशमहाभाग्यं वेणुनादविनोदिनम् 9.21
397. यद्भवत्सङ्गतोऽस्माभिश्श्रुतमेतत्कथामृतम् 10.3
398. यद्यदिच्छसि कर्तुं त्वं तत्तत्सर्वं करोम्यहम् 6.37
399. यद्यदिच्छसि तत्सर्वं विधास्यति तवाच्युतः 5.58
400. यद्यध्रुवं मद्वचनं तदाहं तव मन्दिरे 2.31
401. यद्विवक्षुरहं पृष्टः भवत्यापि तदेवहि 1.2
402. यादवाद्रिं ततः प्राप्य साक्षाच्छेषात्मकं गिरिम् 1.27
403. यूयं शृणुत सर्वेऽपि मुनयो भगवत्कथाम् 2.17
404. यैषा गरुत्मतो माता विनता सा प्रकीर्तिता 2.20
405. यो यस्समायाति तदा नखैस्तं तं व्यदारयत् 7.47
406. यो लिखेन्मनुजो लोके श्रीरङ्गचरितं पुमान् 10.27
407. योजनद्वयमात्रेऽस्माद्भरतो धर्मवत्सलः 9.7
408. रक्षतु श्रीसखो नित्यं देवेशः करुणानिधिः 6.62
409. रक्षां चक्रे तनूजस्य विजिगीषोर्महामतेः 6.61
410. रघुवीरयशश्छत्रनीलदण्डायितात्मना 1.9
411. रङ्गनाथमनुं चित्ते साष्टाक्षरमतन्द्रधी 4.42
412. रङ्गभूकामिनीभूषामुक्ताहारायितात्मना 1.16
413. रङ्गादिदिव्यक्षेत्राणां यात्रा च समजायत 2.12

In Public domain. Digitization Muthulakshmi Research Academy

414. राजन् कदाचिदक्रूरो यात्रायां सक्तमानसः 9.15
415. राजर्षे श्रृणु पक्षीन्द्रः नित्यं नियतमानसः ।6.5
416. राजर्षे श्रृणु मारीचः कश्यपः प्राक् श्रुतो भवेत् ।2.19
417. राजा श्रुत्वा रिपून् सर्वान् विना क्लेशेन 10.21
418. राज्यं मन्त्रिणि निक्षिप्य समारुह्य रथोत्तमम् 1.4
419. रामपातितलं केन्द्रकेतुदण्डानुकारिणा 1.8
420. रूढमूलो भवेद्ज्ञातिर्बाल्ये स्याद्दुपेक्षितः 8.31
421. लक्ष्मीशमनुकुर्वन्तीं कृष्णां तृष्णापहारिणीम् 1.38
422. वटे सुभेद्रे चिक्षेप भक्षणे कृतमानसः 7.9
423. वत्स श्रान्तोऽसि तपसा तुष्टोऽहं ते खगेश्वर 5.25
424. वत्साम्बुधेस्तटे काचित्फल्लीभिल्लैस्समावृता 7.17
425. वत्सेदानीं विमुक्तासीद्दास्यान्माता तवानघ 8.46
426. वत्सैषा मामिका मुर्तिरिह ब्रह्मसमर्चिता 5.54
427. वयं चापि भगवत्सङ्गाद्धन्यास्स्यामाद्य सुव्रत 1.58
428. वरुणश्शरणं कञ्चिन्नोपलेभे पलायितः 7.63
429. वार्यते ह्यन्धतमसं बालेनापि विवस्वता 6.50
430. विज्ञापनमिदं चान्यद्भक्तस्य श्रृणु माधव 5.29
431. विदार्य विहगेन्द्रोऽसौ त्रोटीकोट्या महाबलः 7.39
432. विद्धि मां रङ्गनाथस्य भक्तं दुर्धर्षणं परैः 7.69
433. विन्यस्य निद्रालुमपि जागरूकं जनावने 5.51
434. विभीषणमहाबुद्धिलतोपघ्नायितात्मना 1.10
435. विभूषितं महाहारैर्घनाघननिभप्रभम् 1.47
436. विमानं रङ्गनाथस्य विद्धि क्षेत्रमिदं महत् 1.54

437. विमुच्यतामस्मदम्बा दास्यादस्मात्सुदुस्सहात् 8.45
438. विलोक्य जलधेः पुत्रीं सर्वसम्पत्समृद्धिदाम् 1.34
439. विष्वक्सेनेनैवमुक्तो गरुत्मान् विनतासुतः 5.18
440. वीक्ष्यानूरुं तनूजं तं जातोद्वेगा बभूव ह 3.18
441. वृत्तघात्यपि तद्वज्रं तद्दिव्यकवचां चित्ते 7.49
442. वेगादखण्डं ब्रह्माण्डं कम्पयन् धीरधीर यम् 7.28
443. शङ्खचक्रधरश्श्रीमान् पीतवासा जनार्दनः 9.9
444. शतमन्युश्शतं मन्यून् प्राप भूमीशदुस्तरान् 7.65
445. शतमष्टोत्तरं नाम्नां शृणु राजर्षिसत्तम (.....) 6.10
446. शूद्राश्च भक्तिमन्तस्स्युर्ब्राह्मणेषु शुचिस्मिते 10.23
447. शूरं त्वां वत्स जानामि वैनतेय खगाधिप 6.53
448. शूराश्च कृतविद्याश्च कलावपि च सद्गुणाः 10.19
449. शृणु भूपाल यत्प्रोक्तं क्षेत्रं कुरुपतेरिति 9.4
450. शृणु वत्स पुरा वृत्तं दिव्यं कर्णामृतायितम् 4.12
451. शृणु वत्स मदीयानि वाक्यानि विनतात्मज 8.21
452. श्रीमदुत्तररङ्गेन्द्रकवचेनाभिरक्षितम् 7.40
453. श्रीमानेष ततश्श्रुत्वा दिव्यां रामकथां शुभाम् 1.3
454. श्रीरङ्गनाथमासेव्य मुनिभिः परिपूजिते 10.8
455. श्रीरङ्गनाथोऽक्रूराय तद्रूपं दर्शयिष्यति 9.20
456. श्रुत्वा गर्भवती नारी रङ्गेन्द्रचरितं महत् 10.25
457. श्रुत्वा तस्यैव वदनादिदं वृत्तमहं पुरा 4.20
458. श्रुत्वा त्वद्वदनाम्भोजमकरन्दझरीमिह 6.2
459. श्रुत्वा रामायणकथां महावीरो महामतिः 1.1

In Public domain. Digitization Muthulakshmi Research Academy

460. श्रुत्वा रामायणकथां सेतुं द्रष्टुं समुत्सुकः 2.11
461. श्रुत्वा सर्वेऽपि मुनयो नारदेनाथ कीर्तिताम् 10.1
462. श्रुत्वैतद्वचनं देवि नारदो मुनिसत्तमः 2.15
463. श्रुत्वैतद्वचनं राज्ञो नारदो मुनिसत्तमः 6.4
464. श्वेतच्छत्राणि शतशः प्रकाशन्ते स्म भूपते 5.13
465. स त्वां मोचयिता दास्यादित्युक्त्वा दैवतोत्तमैः 3.22
466. स ददर्श महार्घमणिप्रवरव्रजकान्तिभिरञ्चित 4.46
467. संवाहितपदाम्भोजं कराभ्यां कमलाभुवोः 5.43
468. संसारभयदावाग्निनिर्वापणपयोधरः(.....) 6.15
469. संसेव्याहोबलक्षेत्रे नरसिंहं जगत्पतिम् 1.36
470. संहर्ता त्वं हि विश्वस्य कमलेश नमोस्तुते 5.21
471. सकलोपनिषद्वेद्यस्सद्भूतिस्सत्परायणः 6.31
472. सक्षादुत्तररङ्गेशस्सिंहाद्रौ प्रादुरास ह 9.14
473. सत्यमेवाब्रवीदेषा न सत्यं कथितं मया 2.37
474. सदा दास्ये नियोज्यैनां सुखितात्मा भवाम्यहम् 2.27
475. समग्रभक्तेक्षणभागधेयमुदारलोकेशतपःफलं तम् 4.45
476. सम्प्रणम्याभिवाद्याथ पितरं भक्तिमेदुरः 4.5
477. सम्प्राप्य नैजं भवनं कद्रूः पुत्रानुवाच ह 2.41
478. सम्प्राप्येन्द्रस्य भवनमिदं वचनमब्रवीत् 7.33
479. सम्मोचयितुकामोऽहं कद्रूवाक्यादिहागतः 7.34
480. सम्मोहयसि सापत्न्यविद्वेषः किमयं मयि 2.34
481. सरय्वामथ गङ्गायां कालिन्द्यां च महामतिः 1.5
482. सर्वं सत्यं भवद्वाक्यं स्वच्छोऽयं तुरगस्सखि 2.28

In Public domain. Digitization Muthulakshmi Research Academy

483. सर्वकर्मफलं ब्रह्मपूजि(.....)पाञ्चितः 6.19
484. सर्वक्षेत्रादपि क्षेत्रमेतद्वेगेन सिद्धिदम् 9.6
485. सर्वक्षेत्रेतपस्सिद्धिः कोटिवर्षेण या भवेत् 4.18
486. सर्वतो विजयस्तेषां कुतस्तेषां पराभवः 7.4
487. सर्वत्र चिरकालेन प्रसीदति हरिस्स्वयम् 4.38
488. सर्वदा सर्वजगतां नाथो नारायणस्स्वयम् 3.10
489. सर्वदा सर्वजगतां नाथो नारायणस्स्वयम् 4.36
490. सर्वदावहितैः पाल्यमित्युक्त्वा विनतासुतः 8.49
491. सर्वराक्षस(.....) सर्वात्मा सारसासनः 6.16
492. सर्वलक्षणसम्पन्नस्सर्व(स?....)मृद्धिदः 6.21
493. सर्वसम्पत्समृद्धिं च स प्राप्नोति धरातले 6.33
494. सर्वामाज्ञापयन् सेनां युद्धाय कृतनिश्चयः 7.43
495. सस्नौ ब्राह्मनदे तत्र नियमेन समन्वितः 5.2
496. सहनेनैवामृतेन गतास्माकममर्त्यता 8.18
497. साकं सर्वपरीवारैः प्रसन्नः कमलेक्षणः 5.9
498. साक्षान्मदात्मिकामेनां विद्धि मूर्तिं खगोत्तम 5.36
499. साधु पृष्टं महाभाग महाभागवतोत्तम 2.16
500. साधु पृष्टं महाभाग महाभागवतोत्तम 9.3
501. साधु वीक्षस्व भोः कद्रु स्वच्छः पुच्छोऽस्य 2.29
502. सालैस्तालैस्तमालैश्च पाटलाशोकचम्पुकैः 4.15
503. सुधां समादाय यथापुरं पुनर्निक्षिप्य 8.65
504. सेवमानांस्ततस्तत्र पप्रच्छ मुनिसत्तमान् 1.49
505. सेवार्थमिह देवस्य नारदोऽप्यागमिष्यति 1.57

In Public domain. Digitization Muthulakshmi Research Academy

506. सोऽपि दास्याद्विमुक्तां तां धर्मपत्नीं यशस्विनीम् 8.51

507. स्थलं विचिन्वन् निक्षेप्तुं तौ तदा स महाबलः 7.8

508. स्नात्वा संस्मृत्य रामस्य वृत्तं विस्मितमानसः 1.12

509. स्नात्वाथ तुङ्गभद्रायां पिनाकिन्यां ततः परम् 1.6

510. हतास्स इति निर्लज्जाः क्रन्दन्ति स 7.57

511. हृदयं परमात्मा स्याच्छान्त्य(.....)ज्यते 6.12

512. हृष्टान्तरं गोमात्राथ तातस्य निकटं ययौ 8.50

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

चपेटाहतिस्तुतिः

पुरोवाक्

होसदुर्गं कृष्णकविना वनपर्तिशासकस्य राजा रामेश्वररायस्य प्रार्थनामङ्गीकृत्य चपेटाहतिस्तुतिः एकस्यामेव नाड्यां विरचिता। अन्तिमश्लोके विषयमेनं स्पष्टीचकार कविः।

कृष्णागोदावरीसंवलयितवनपर्त्याख्यपुर्या अधीशो य
श्श्रीमान् रामकृष्णावनिपतितनुजोऽनेकभाषाप्रवीणः।
श्रीमद्रामेश्वराख्याकलितनृपमणेराज्ञया तस्य नाड्या
मेकस्यां रङ्गनाथाहतिनुतिमतनोन्नव्यदुर्गस्थकृष्णः॥ च.स्तु. 29॥

स्तुतावस्याम् अष्टाविंशतिः श्लोकास्सन्ति। आर्या मालिनी स्रग्धरा वसन्ततिलका शार्दूलविक्रीडितं मन्दाक्रान्तादिभिः वृत्तैः श्लोकाः गुम्फिताः। चपेटाहतिस्तुतिरचनाशैली हृदयङ्गमा विद्यते। शब्दार्थालङ्कारैः सहृदयहृदयाह्लादकारिणीयं स्तुतिरित्युक्तौ नास्ति संशयलेशः।

चपेटाहतिस्तुतिकाव्यसारः

श्रीरङ्गनाथः पद्मनिकेतनावसुमतीपाणिग्रहोत्सवाय स्पृहयामास। नीलादेव्याः अभिप्रायं ज्ञातुकामः रङ्गनाथः तस्याः गेहं प्रतस्थे। नीला पूजार्हाणि द्रव्याणि तं प्रत्युदैत्। सपर्यासमाप्तेः अनन्तरं नीला रङ्गनाथस्य आगमनहेतुम् पप्रच्छ। रङ्गनाथः ससङ्कोचं प्राह। श्रीदेवीवसुमत्योः पाणिपीडनमहोत्सवमिच्छामीति अवोचत् देवः। रोषनयना नीला चपेटेन कठिनं जघान तम्। देवानामपि पत्नीपरतन्त्रता खलु इति कविः दीनवचसा वर्णयति जगत्पतेः दीनताम्। रङ्गनाथः कपोलफलकं स्पर्शं स्पर्शं म्लानमुखः सञ्जातः। ततः नीला गेहं प्राविशत्।

तदा विष्णुचित्तः नीलां जगाद। नीला तुलसीवने लब्धा रक्षिता पालिता च। मालाः रचयित्वा मूर्धनि धृत्वा पुनः रङ्गनाथम् अलङ्कर्तुं मह्यम् अर्पयति स्म। अपराधं कृतवती अपि त्वं रङ्गनाथस्य प्रियासि। तादृशं हरि

In Public domain. Digitization Muthulakshmi Research Academy

कपोले चपेटेन अताडयत् किल। रोषं जहि। भवत्याः करुणां प्रतीक्षते। दयस्व इति पितृवचनं परिपाल्य सम्मतिम् असूचयत् नीलादेवी। वीतरोषां नीलां मुकुन्दः आश्वास्य श्रीदेवीभूदेव्योः पाणिग्रहञ्च चक्रे।

स्तुतिरियं श्रीरङ्गापुरे श्रीरङ्गनाथस्वामिदेवालये प्रचाल्यमाने ब्रह्मोत्सवे फाल्गुनैकादश्यां श्रीरङ्गनाथसन्निधौ पाणिग्रहोत्सवे प्रतिवर्षं गीयते स्म।

इति बुधजनविधेया
डॉ. के. वरलक्ष्मीः

In Public domain. Digitization Muthulakshmi Research Academy

श्रीरस्तु

श्रीहयग्रीवाय नमः

श्रीमते श्रीनिवासब्रह्मतन्त्रपरकालमहादेशिकाय नमः

चपेटाहतिस्तुतिः

निर्वाघातसुधामुखाम्बुलहरीरिङ्खत्तरङ्गच्छटा
वातोद्धूततमालमालगरुडक्ष्माभृत्तटीभूषणम्।
श्रीमानुत्तररङ्गभूमिललनाकान्तः कदाचिज्जग-
त्यैच्छत्पद्मनिकेतनावसुमतीपाणिग्रहाख्योत्सवम्॥ 1 ॥

अज्ञातं नीलयाहं यदि च ललनयोः पाणिपद्मं ग्रहीष्या-
म्येषा कुप्येत्तदस्या हृदयगतमभिप्रायजातं विदित्वा।
पश्चाद्यत्नं विधास्याम्यहमिति मनसालोच्य रङ्गेश्वरोऽसौ
तस्या गेहं प्रतस्थे विविधमणिगणश्रेणिभूषामनोज्ञः॥ 2 ॥

हृष्यन्तोऽलं धरन्तः कनकविरचितोद्दण्डदण्डानखण्डान्
वल्गन्तस्सन्नदन्तः कुसुमसमुदयान् सङ्किरन्तस्स्फुरन्तः।
आचन्तो वादयंस्ततघनमभितो दीप्ररूपान् प्रदीपान्
शस्तैर्हस्तैर्धरन्तो द्रुततरमभजन् प्राङ्गणे रङ्गनाथम्॥ 3 ॥

उद्ध्त्योद्धृत्य शीर्षेऽञ्जलिततिमधिकं हर्षबाष्पाविलाक्षं
दूरे दूरे नमद्भिस्सरसिजनयनः स्तूयमानो महद्भिः।
श्वेतच्छत्रेण राजन्मणिमकुटतटो वीजितश्चामराभ्यां
नीलागेहाङ्गणप्राग्भुवि चरणयुगं मन्दमाधत्त देवः॥ 4 ॥

श्रुत्वा देवमुपागतं विधुमुखी स्मित्वा प्रगृह्यार्हणा-
योग्यान् रत्नललामकाञ्चिवलयद्वन्द्वप्रसूनोत्करान्।
सख्या दत्तकरावलम्बनमतिस्मेरोल्लसच्चामर
द्वन्द्वान्दोलनजातमारुतधुतश्रान्तिस्तदा प्रत्युदैत॥ 5 ॥

 In Public domain. Digitization Muthulakshmi Research Academy

सरभसमिलत्कान्ताहस्तप्रदत्तसपर्यया
प्रतिमदममुं रङ्गाधीशं यथार्हमगर्हितम्।
जलजनयना नीलालोलालकाव्यजनानिलै
र्ललितललितं सम्पूज्याराज्जगाद कृतस्मिता॥ 6 ॥

अये रङ्गाधीश प्रकृतिसुभगम्भावुक हरे
कुतोऽस्मद्गेहस्याङ्गणभुवमुपागा बहु चिरात्।
शरत्काले मेघोदय इव विचित्राध्वनि जनं
करोत्येनं देवागमनरभसो जाङ्घिकतमम्॥ 7 ॥

करसरसिजयुग्मं साधु संयोज्य लज्जा-
विनमितवदनां तां मन्दमित्थं वदन्तीम्।
सरसिजनयनोऽसौ वीक्ष्य हृष्टान्तरङ्ग-
स्सभयमिव जगाद प्राञ्जली रङ्गनाथः॥ 8 ॥

कन्ये ललितमनोज्ञे धन्ये दुग्धाब्धिनन्दिनीभूम्यौ
इच्छाम्युद्वोढुमहं यद्याज्ञा दीयते सखि भवत्या॥ 9 ॥

इत्थं भाविसपत्नीनामक्षरनिशमनेन नीलायाः।
नीलतरं वदनमभूद्रोषात्प्रस्फुरितदन्तवसनायाः॥ 10 ॥

स यावद्देवोऽसौ वचनमसमाप्तं रचयति
क्षणं तं रोषेण भ्रमदरुणनेत्राब्जनयना।
जावदुद्धृत्यैषा भुजमथ चपेटेन कठिनं
जघान श्रीमन्तं जलजनयनं गण्डफलके॥ 11 ॥

वामानां कियती पुनः कठिनता यल्लोककान्तं महा
श्रीमन्तं विनयानताञ्जलिमपि क्रूरं जघानाब्जदृक्।
हा पत्नीपरतन्त्रता च कियती पुंसां यदेनां वधू
मेवं रीतिमपि प्रभुर्न किमपि द्वित्राक्षरं वावदत्॥ 12 ॥

In Public domain. Digitization Muthulakshmi Research Academy

सर्वत्रापि पुः.....प्रभुर्विधुमुखी सान्निध्यभूमौ पुनः
पुंसश्शौर्यभरः क्व वा भवति किं ब्रूमो विचित्रं वयम्।
यस्याज्ञां विधिशङ्करेन्द्रवरुणादित्यादयो बिभ्रति
प्रौढां मौलितले स यद्विषहते वध्वाश्चपेटाहतिम्॥ 13 ॥

नीला जघान देवं नासीत्किमपि च विचार एवात्र।
यद्याचचार देवश्श्रीमान् एवं तदा किमु स्याद्वा॥ 14 ॥

हन्त स्त्रियो बहुतरं कृतवत्यस्सुकृतमतिघनश्रीकम्।
सर्वोत्तमोत्तममपि प्रियं तृणीकृत्य तेन लाल्यन्ते॥ 15 ॥

द्वेषस्सपत्नीषु कियान् वधूनां यद्भार्गवीभूमिविवाहयाञ्चाम्।
कुर्वाणमब्जाक्षमियं जघान जनेषु पश्यत्स्वपि लीलयेव॥ 16 ॥

यावद्रङ्गपतेः कपोलफलके पद्मोपमस्याप्यभू
च्छ्रीभूपाणिनिपीडनश्रवणतो वज्रायितस्याहतिः।
नीलापाणितलस्य तावदखिलास्तत्राधिकारस्थिता
जघ्नुस्तस्य पुरस्सरान् परिजनान् पक्षीन्द्रभूभृन्मणेः॥ 17 ॥

धूतच्छत्रमनादृतार्हणमणिप्रोद्धूतदीपव्रजं
सन्धावत्सु यथायथं परिजनव्यूहेषु रङ्गेश्वरः।
स्पर्शं स्पर्शमयं कपोलफलकं गाढं तया ताडितं
म्लानम्लानमुखोऽभवद्विधुमुखीरोषाद्गृहं प्राविशत्॥ 18 ॥

तावन्नीलाविरचितदिव्याज्ञापारवश्यमुपयान्तः।
रङ्गपतेरखिलश्रियमपजह्रुः परिजनास्तस्याः॥ 19 ॥

चित्रं लक्ष्मीपरिणयहेतोः स्रष्टुं समीपया तस्य।
लक्ष्मीमहरन्नीला वाचां दूरे चरित्रमिह सुदृशाम्॥ 20 ॥

आहूतस्तावदेव स्वविरचितनतिर्विष्णुचित्तो प्रमत्त
स्तद्वृत्तं वेद्यमानस्सहरिपरिजनैर्मानितो मन्दमन्दम्।

In Public domain. Digitization Muthulakshmi Research Academy

नीलायास्सद्म गत्वा धुतमणिरशनां मुक्तमुक्ताकलापां
रोषश्वासातिशुष्यन्मृदुरदवसनां सादरं सञ्जगाद॥ 21 ॥

अयि श्रुणु मम वत्से जल्पितं कल्पनैः किं
वनभुवि तुलसीनां हन्त लब्धा मयासि।
चिरमपि भवने मे रक्षिता देवि नीले
पितृवचनमुदारं मान्यथा शङ्कनीयम्॥ 22 ॥

रङ्गेन्द्रस्य कृते सभक्तिरचितास्सूनस्त्रजो या मया
तास्त्वं मूर्धनि बिभ्रती बहुचिरं ज्ञाता कदाचिन्मया।
तांस्त्यक्त्वा विधृतांस्त्वया सुमसरानन्यांश्चिकीर्षन्नहं
तस्य प्रागहमेव नित्यमभवं सर्वापराधालयः॥ 23 ॥

तादृग्दया त्वयि हरे रचितापराधा-
प्यस्य प्रियासि विगतंश्च नुते कृतं वा।
यत्त्वं कपोलफलके तमताडयः किं
कार्यं मयाद्य जहि रोषममुं कुमारि॥ 25 ॥

शुष्यन्मुखोऽसौ भगवान् भवद्गृहद्वारे भवत्याः करुणां प्रतीक्षते।
दयस्व तस्याब्धिकुमारिकाक्ष्मयोरिहैव पाणिग्रहणञ्च रोचताम्॥26॥

इति पितृवचनं तच्छृण्वती साधु नीला-
प्यथ भवतु तथैवेत्युत्तरं तं जगाद।
तदनु च विदितार्थो विष्णुचित्तोदितेन
प्रभुरपि पुनरागाच्छ्रीक्षितिभ्यां समेतः॥ 27 ॥

नीलामेवं पितृवचनतो वीतरोषां मुकुन्दः
प्राप्याश्वास्यम्बुनिधितनुजाभूमिपाणिग्रहञ्च।

In Public domain. Digitization Muthulakshmi Research Academy

चक्रे रामेश्वरनृपनुतो देवतानां महार्घे
भेरीशब्दे जयति गरुडक्ष्माभृतो मौलिरत्नम्॥ 28 ॥

कृष्णागोदावरीसंवलयितवनपर्त्याख्यपुर्या अधीशो
यश्श्रीमान् रामकृष्णावनिपतितनुजोऽनेकभाषाप्रवीणः।
श्रीमद्रामेश्वराख्याकलितनृपमणेराज्ञया तस्य नाड्या
मेकस्यां रङ्गनाथाहतिनुतिमतनोन्नव्यदुर्गस्थकृष्णः॥ 29 ॥

॥ इति श्रीप्रत्यग्रदुर्गकविसार्वभौमकृष्णस्य कृतिषु चपेटाहतिस्तुतिः॥

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitized by Muthulakshmi Research Academy

अक्षरक्रमगतश्लोकसूची

श्लोकपादः	श्लो.सं.
1. अज्ञातं नीलयाहं यदि च ललनयोः पाणिपद्मं - स्रग्धरा	02
2. अयि श्रुणु मम वत्से जल्पितं कल्पनैः किं – मालिनी	23
3. अये रङ्गाधीश प्रकृतिसुभगम्भावुक हरे - वसन्ततिलका	08
4. आहूतस्तावदेव स्वविरचितनतिर्विष्णुचित्तो प्रमत्त - स्रग्धरा	22
5. इति पितृवचनं तच्छृण्वती साधु नीला-मालिनी	27
6. इत्थं भाविसपत्नीनामक्षरनिशमनेन नीलायाः। आर्या	11
7. उद्ध्त्योद्धृत्य शीर्षेऽञ्जलिततिमधिकं हर्षबाष्पाविलाक्षं- स्रग्धरा	04
8. कन्ये ललितमनोज्ञे धन्ये दुग्धाब्धिनन्दिनीभूम्यौ - आर्या	10
9. करसरसिजयुग्मं साधु संयोज्य लज्जा – मालिनी	09
10. कृष्णागोदावरीसंवलयितवनपर्त्याख्यपुर्या अधीशो - स्रग्धरा	29
11. चित्रं लक्ष्मीपरिणयहेतोः स्रष्टुं समीपया तस्य। आर्या	21
12. तादृग्दया त्वयि हरे रचितापराधाप्यस्य – मन्द्राक्रान्ता	25
13. तावन्नीलाविरचितदिव्याज्ञापारवश्यमुपयान्तः। शार्दूलविक्रीडतम्	20
14. द्वेषस्सपत्नीषु कियान् वधूनां - उपजातिः	17
15. धूतच्छत्रमनादृतार्हणमणिप्रोद्धूतदीपव्रजं – शार्दूलविक्रीडितम्	19
16. निर्वाघातसुधामुखाम्बुलहरीरिङ्खत्तरङ्गच्छटा - शार्दूलविक्रीडितम्	01
17. नीला जघान देवं नासीत्किमपि च विचार एवात्र। आर्या	15
18. नीलामेवं पितृवचनतो वीतरोषां मुकुन्दः - वसन्ततिलका	28
19. पादन्यासप्रतिपदचलद्गाढवक्षोजयुग्मां - वसन्ततिलका	06
20. यावद्रङ्गपतेः कपोलफलके पद्मोपमस्याप्यभू - शार्दूलविक्रीडितम्	18
21. रङ्गेन्द्रस्य कृते सभक्तिरचितास्सूनस्रजो - शार्दूलविक्रीडितम्	24
22. वामानां कियती पुनः कठिनता यल्लोककान्तं महा - स्रग्धरा	13

In Public domain. Digitization Muthulakshmi Research Academy

23. शुष्यन्मुखोऽसौ भगवान् भवद्गृह - शङ्खचूडा	26
24. श्रुत्वा देवमुपागतं विधुमुखी स्मित्वा प्रगृह्यार्हणा- शार्दूलविक्रीडतम्	05
25. स यावद्देवोऽसौ वचनमसमाप्तं रचयति - वसन्ततिलका	12
26. सरभसमिलत्कान्ताहस्तप्रदत्तसपर्यया - वसन्ततिलका	07
27. सर्वत्रापि पुः.....प्रभुर्विधुमुखी सान्निध्यभूमौ - शार्दूलविक्रीडितम्	14
28. हन्त स्त्रियो बहुतरं कृतवत्यस्सुकृतमतिघनश्रीकम्। आर्या	16
29. हृष्यन्तोऽलं धरन्तः कनकविरचितो - स्रग्धरा	03

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy
ISBN - 978-81-969575-6-8



श्रीकृष्णकविप्रणीतम्

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2024